व्रणं गोमांसचूर्णेन बन्धं बन्धं विमुच्य च ।
सप्तरात्राद्व्रणे रूढे कृष्णभागे समे स्थिरे ॥

स्नेहाञ्जनञ्च कर्तव्यं नस्यञ्च क्षीरसर्पिषा ।
तथापि पुनराध्माने भेदच्छेदाधिकां क्रियाम् ॥

युक्त्या कुर्यादन्यवर्ति च्छेदने स्यान्निमज्जनम् ।
यक्षाक्षिपत्रस्वरसो मांक्षिकेण समन्वितः ॥

कंसे ताम्रेण संघृष्टः क्षतशुक्लाक्षिकापहः ।
शिरा शुक्ले च दृष्टिघ्ने चिकित्सात्रणशुक्लवत् ॥१५०॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

नित्यञ्च शुक्लेषु श्रुतं यथास्वं पाने च शर्मे च घृतं विदध्यात् ।
न हीयते लब्धबलां तथा च तीक्ष्णाञ्जनैर्दृक्प्रततं प्रयुक्तैः ॥

पञ्चभूतप्रसादोत्थां मसूरदलसन्निभाम् ।
शीतसात्म्यां नृणामाहुर्दृष्टिं दृष्टिनिरूपिकाम् ॥

दोषे द्विष्टिस्थमाद्यं पटलमुपगते............
व्यत्यासेन द्वितीयं पटलमुपगते स्थूलसूक्ष्मादिवस्तु ।
तैमिर्यं स्यात्तृतीयं पटलमुपगते स्वच्छचेलावृतेव
क्षीणा दृष्टि....सकाचपटल....लिङ्गनाशश्चतुर्थम् ॥

वाताज्जातेरुणाभं चलमिव तिमिरे केशजालानि पश्ये
त्पित्तान्मायूरपिञ्छज्वलनकणनिभं नीलवर्णं विशेषात् ।
मल्लीशङ्के........र्निचितमिवसित स्निग्धवर्णं बलासा
द्रक्तादारक्तताम्रं द्वयसकलभवेद्व्यक्तलोलं त्वकस्मात् ॥

काचोऽरुणः स्यात्पवनेन जातः पित्तेन नीलो धवलः कफोत्थः ।
रक्तेन रक्तासितवर्णदृष्टिर्द्वाभ्यां त्रिभिर्वापि विचित्ररागः ॥

दृष्टिर्धूमावृते वात्यरुणपृथुतनु मारुताल्लिङ्गनाशा–
त्पित्तान्नीला बलासाच्चलति द्रुतमधिष्ठाय मूर्तो बलासः ।
छायावृद्धोष्णपीतस्स च पुनरसृजा निष्प्रभारक्तताम्रा
दृष्टिर्जायेत जाते द्वयसकलभवे रज्यते चित्तरागैः॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अदर्शनाद्भास्वरवस्तुदर्शना....विहीना प्रकृतिस्थिते च ।
तथा च वैदूर्यरुचिश्च सप्तमः सलिङ्गनाशः पुनरौपसर्गिकः ॥

गम्भीरान्तः प्रतिष्ठासृक्शिरां सङ्कोचनेऽनिलात् ।
दृष्टिः पित्तेन ह्रस्वाख्या........स्रांसदर्शिनी ॥

शोफज्वरशिरोरोग सन्तप्तस्यानिलादयः ।
धूमाविलां धूमदुष्टदृशं कुर्युः सदूमरः ॥

पित्तात्पित्तविदग्धया कनकदृक्पीताह्ववीक्षा च दृ....
........याम्लविदग्ध....रसिकया स्यासृङ्मलैः कण्डुवा ।
तप्तस्योष्णविदग्धयाशु शिशिराम्भोमज्जनान्मूर्धगै—
दोंषास्तैर्मलिनाविलं सितमहंमत्तौ स भवेत् ॥१६०॥

तन्नकुलस्येव मलैः पश्यति चित्रं दिवा स नकुलान्धः ।
अर्केऽस्तमितेदोषै स्तनौ स्थगितानु नक्तान्धः ॥

विना कफाल्लिङ्गनाशाद्गम्भीरां........त्तं त्यजेत् ।
पटुकानकुलान्धश्च याप्याः शेषांस्तु साधयेत् ॥

द्वादशेति गदा दृष्ट्या निर्दिष्टाः सप्तविंशतिः ।
तिमिरं काचतां याति काचोष्णाद्यमुपेक्षया ॥

नेत्ररोग........रं तिमिरं साधयेद्द्रुतम् ।
वातादिजेऽस्मिन्त्रिफलां लिह्यात्तैलाज्यमाक्षिकैः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शुक्लैरण्डान्मूलमधोग्रा शतपुष्पा पुष्पोध्दूतं यच्च बृहत्यास्तगरश्च ।
पक्कं....पयस्कं तिमिरघ्नं नस्यं श्रेष्ठं व्याधिषु चोर्ध्वेषु परेषु ॥

शर्करामधुसम्मिश्रं वराक्काथं पिबेन्निशि ।
तुलां पचेत्यक्षीरन्त्या द्रोणेवा पादशेषिते ॥

तत्क्काथे द्विगुणं क्षीरं घृतप्रस्थं विपाचयेत् ।
प्रपौण्डरीककाकोलीपिप्पलीलोध्रसैन्धवैः ॥

शाताह्वा मधुकद्राक्षा सितादारुफलत्रयैः ।
कार्षिकैर्निशि तत्पीतं तिमिरापहरं परम् ॥

त्रिफला क्काथकल्पेन सपयस्कं शृतं घृतम् ।
पीतं निशामुखे हन्यात्सर्वाणि तिमिराणि च ॥

यष्टीमधुककाकोली व्याघ्रीकृष्णामृतोत्पलैः ।
पालिकैस्ससिताक्षौद्रै........स्थं पचेत्समैः ॥१७०॥

अजाक्षीरवरा चाशी माकृतस्स्वरसैः पृथक् ।
महात्रै....लमित्ये....त्परं दृष्टिविकारजित् ॥

अशीतितिलपुष्पाणि मरिचानि च षोडश ।
पञ्चाशज्जातिपुष्पाणि षष्टिपिप्पलितण्डुलान् ॥

इयं चन्द्रप्रभानाम (म्नी) वर्तिस्तिमिरजित्तथा ।
मरिचामलककरम्बैर्वृद्धांशैर्भृङ्गपेषितैः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मनोह्वासैन्धवव्योषशङ्खनाभिरसाञ्जनैः ।
कृतकं चन्दनं फेनो विलङ्गानि सितोपला ॥

कुक्कुटाण्डकपालञ्च जलपिष्टा सुखावती ।
हन्त्येव मधुना घृष्टा काचतैमिर्यशुक्लकान् ॥

गोमूत्रेछगणरसेम्लकाञ्जिके च स्त्रीस्तन्ये हविषि निशे समाक्षिके च ।
यत्तुत्थं ज्वलितमनेकशो निषिक्तं तत्कुर्याद्गरुडसमं नरस्य चक्षुः ॥

श्रेष्ठारसं भृङ्गरसं विषमाज्यमजापयः ।
यष्टीरजश्च यत्सीसं सप्तकृत्वं पृथक्पृथक् ॥

तप्तं तप्तं पायितं तच्छलाकां नेत्रे युक्ता साञ्जनानञ्जना वा ।
तैमिर्यार्मस्रावपैच्छिल्यपिल्यं कण्डूजाड्यं चालर्जीं चापहन्ति ॥

आजबीजमरिचामलकत्वक्तुत्थयष्टिमधुकैः समभागैः ।
छायथैव गुलिकाः परिशुष्का नाशयन्ति तिमिराण्यचिरेण ॥

ऊष....पिष्ट्वा दशाद्रिकर्ण्याश्च पुष्पाणि ।
तिमिरं जयेदथैकं मरिचाढ्यं द्रोणपुष्पशतम् ॥१८०॥

लिकुचपक्वफलोदरसंस्थितं मरिचमर्ककरैरवशोषितम् ।
दृषदि वारिणि घृष्टमिदं नृणां तिमिरकाचनिशान्धजिदञ्जनात् ॥

भूभुजगमुष्टिनिष्कं तुत्थं निष्कद्वयं भसितशुष्कश्च ।
निष्कश्च मरिचमेत त्तिल....कुडपतैलपरिसिशिष्टम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

चिञ्चारसं स्वरसपिष्टमुरङ्गिबीजं कंसे प्रलिप्य परिशोष्य तदातपेन ।
तैलं ततश्शृतमिदं शशिपादभागं योज्यं दृढेर्मतिमिरे....... क्षिण ॥

फलत्रयञ्चापि कटुत्रयञ्च ज्योतिष्मतीत्रिल्लकरञ्जबीजम् ।
प्रपौण्डरीकं मधुकञ्च ताम्रं सिन्धूद्भवं वै स्फटिकं च शङ्खम् ॥

रसाञ्जनं गैरिकचन्दने द्वे द्राक्षानिशाशाबरलोध्रकञ्च ।
तुत्थञ्च पीताह्वयरोहिणी च पेष्यं करञ्जस्वरसेन सर्वम् ॥

तुत्थादिरेको द्विगुणो वचादिः प्रपौण्डरीकादिगणस्त्रिभागः ।
शेषश्चतुर्भागमिदं निहन्याद्वर्तिस्सुनेत्री सकलांश्च रोगान् ॥

त्रिफलात्रिकटूनि लवङ्गवचा हरितालरसांजनसल्लवणम् ।
शबराह्वयताम्ररजः स्फटिकं रजनीद्वयरोचनवारिचरम् ॥

तुटिचन्दनताप्यलघुक्षतजः करकं मधुकोदधिफेनयुतम् ।
शशिपीतकरोहिणि सीसरुजा गिरिशृङ्गगवाक्षिक....नम् ॥

क्षुररेणुकमौक्तिक तुत्थतुटी परिकूर्मवराटककान्तमुखम् ।
अमृताज्यधिनिम्बकरञ्जरसै सुरसाञ्जनजातिमुरङ्गरसैः ॥

सुनिषण्णकबीजकपूर........स्वरसं पयसा च गवां विहितं
दिनषड्द्वयतो मधुतैलघृतैः द्रववर्तिरियं सलमध्यगता ॥१९०॥

तिमिरे पटले मणिकाच गदे वपशुक्लगदेप्यजिके महति ।
निमिना विहितं बलसंयमिना नयनामयसप्ततिनाशकरी ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सामान्यं साधनमिदं प्रतिदोषमतः शृणु ।
वातजे तिमिरे तत्र दशमूलाम्भसा घृतम् ॥

क्षीरे चतुर्गुणे श्रेष्ठ........पिबेत्ततः ।
शङ्खिनी तिल्वकः श्यामा दन्तीक्वाथे त्रिपाचितम् ॥

त्रिवृत्कल्कप्रतीवारं विरेकार्थे घृतं पिबेत् ।
प्रपुण्डरीकबृहती बलानलदसैन्धवैः ॥

दार्विकै लाढकी कृष्णा हरिद्रामधुयष्टिभिः ।
सिद्धं चतुर्गुणं क्षीरतैलं नसि निषेचयेत् ॥

पित्तजे तिमिरे सर्पिर्जीवनीयफलत्रयैः ।
विपाचितं पाय........न्नदूधस्य त्रिध्यते शिराम् ॥

शर्करैलात्रिवृच्चूर्णैर्मधुयुक्तैर्विरेचयेत् ।
नस्ये चाज्यं शृतं क्षीरे जीवनीयसितोत्पलैः ॥

श्लेष्मोद्भवेऽमृताक्वाथ........णशृतं घृतम् ।
विद्धेद्धितां पीतवतो दद्याच्चानुविरेचनम् ॥

क्वाथं पूगाभया शुण्ठी कृष्णां कुम्भनिकुम्भजाम् ।
ह्रीबेरदारुद्विनिशा कृष्णा कल्कैः पयोयुतैः ॥

द्विपञ्चमूलीनिर्यूहे पक्वं तैलञ्च नावनम् ।
रक्तपित्तजवत्सिद्धि शीतैश्चास्त्रं प्रसारयेत् ॥२००॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

संसर्गसन्निपातोत्थे यथा दोगोदयं क्रिया ।
काचेष्येषा क्रिया हित्वा शिरां द (वि) द्या (ध्या) ज्जलौकसा ॥

विध्येत्सुजातं निष्पेष्यं लिङ्गनाशं कफोद्भवम् ।
सावर्तक्यादिभिः षड्भिर्विवर्जितमुपद्रवैः ॥

सोऽयं जातो हि विषमो दधिमण्डनिभस्तनुः ।
शलाकयाऽवकृष्टोऽपि पुनश्चोर्ध्वं प्रपद्यते ॥

करोति वेदनां तीव्रां दृष्टिं च स्थगयेत्पुनः ।
श्लैष्मलैः पूरयेचाशु सोऽन्यैः सोपद्रवैश्चिरात् ॥

श्लेष्मको लिङ्गनाशो हि हितत्वाच्छ्लेष्मणस्सितः ।
तस्यान्यदोषाभिंभवात् भवत्यानीलतो गदे ॥

तत्रावर्तिचलादृष्टिरावर्तक्यारुणा सिता ।
शर्करार्कपयोलेश निचितेवघनाति च ॥

राजीमती दृङ्निचिता शालिशूकाभराधिभिः ।
विषमच्छन्नदग्धाभा रुक् छिन्ना....शुंका स्मृता ॥

दृष्टिः कांस्यसमच्छाया चन्द्रकी चन्द्रकाकृतिः ।
छत्री तानेकवर्णा च छत्रकी नाम नीलिकाम् ॥

न विध्येदशिराहार्णां नतपीनसकाशिनाम् ।
नाजीर्णभीतवामिताशिरःकर्णाक्षिशूलिनाम् ॥

(४)

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अथ साधारणे काले सिद्धः सम्भोजितात्मनः ।
देशे प्रकाशे पूर्वाह्णे भिषक्चानुच्चपीठगः ॥२१०॥

यच्चित्तस्योपविष्टस्य छिन्नाक्षस्य मुखानिलैः ।
अङ्गुष्ठमृदिते नेत्रे दृष्टा दृष्टौ प्लुतं मलम् ॥

स्वां नासां प्रेक्षमाणस्य निष्कम्पं मूर्ध्नि दारिते ।
कृष्णादर्धाङ्गुलं मुक्त्वा तदर्धार्धमपां गतः ॥

तर्जनीमध्यमाङ्गुष्ठै श्शलाकां निश्चलां धृताम् ।
देवच्छिद्रं नयेन्नाथ ऊर्ध्वं वामं धयन्निव ॥

सव्यं दक्षिणहस्तेन नेत्रं सव्येन चेतरत् ।
विध्येत्सुविध्ये शब्दस्य वक्चाम्बुलवश्रुतिम् ॥

सान्त्वयन्नातुरं चानु नेत्रं स्तन्येन सेचयेत् ।
शलाकायास्ततोग्रेण निर्दिशेद्दृष्टिमण्डलम् ॥

अबाधमानं शनकैर्नासां प्रतिनुदंस्ततः ।
उच्छिन्दनाचापहरेद्दृष्टिमण्डलगं कफम् ॥

स्थिरे दोषे चले वापि स्वेदयेदक्षि बाह्यतः ।
अथ रूपेषु दृष्टेषु शलाकामुद्धरेच्छनैः ॥

घृतप्लुतां पिचुं दत्त्वा बद्धाक्षं स्थापयेत्ततः ।
विध्यादन्येन पार्श्वेन तमुत्तानं द्वयो र्व्यधेत् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

निवातशयनेऽभ्यक्ता ....पादहिरे—तम् ।
क्षवधुं कासमुद्गारं ष्ठीवनं वमनं हसः ॥

अधोमुखस्थितिः स्नानदन्तधावनभक्षणम् ।
सप्ताहं नाचरेच्चात्र प्रागुक्ता रुग्णयन्त्रणा ॥२२०॥

शक्तितो लङ्घयेत्सिञ्चेत्कोष्ठेन रुजिसर्पिषा ।
सव्योग्रामलकं वान्नमश्नीयात्सघृतं द्रवम् ॥

विलेपी वा त्र्यहाच्चास्य क्वाथैर्मुक्त्वाक्षि सेचयेत् ।
वातघ्नैः सप्तमेत्वह्नि सर्वदैवाक्षि मोचयेत ॥

विद्धेऽक्षिण कार्ये स्वेदादौ नियमोऽयं विधीयते ।
स्वेददाहप्रतीमर्शान् सद्यो विच्छेत्तु सेचनम् ॥

अवपीडं तृतीयेह्नि युञ्ज्यात्तद्वज्जलौकसः ।
सप्ताहान्ते शिरामोक्षं विरेकं वस्तिकर्म च ॥

यन्त्रणामनुरोध्येत दृष्टेरास्थैर्यदात्ततम् ।
रूपाणि सूक्ष्मदीप्तानि सहसा नावलोकयेत् ॥

आढकीमूलमरिच हरितालरसाञ्जनैः ।
विद्धेऽक्षिण गरुडावर्तिर्योज्या दिग्धाम्बुपेषिता ॥

जातीशिरीषधवमेष विषाणपुष्पवैडूर्यमौक्तिकफलं पयसा विपिष्टम् ।
आजेन ताम्रमनुना प्रतनु प्रदिग्धं सप्ताहतः पुनरिदं पयसैवपिष्टम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पिण्डञ्जनं हि तमनातपशुष्कमक्ष्णि विद्धे प्रसादजननं बलकृच्च दृष्टेः ।
स्रोतोञ्जविद्रुमशिलोदधिफेनतीक्ष्णैरस्यैव तुल्यमुदितं गुणकल्पनाभिः ॥

सूर्योपरागं........विद्युदादि विलोचनेनोपहतेक्षणस्य ।
सन्तर्पणं स्निग्धहिमादियोज्यं तथाञ्जनं हेम्नि घृतेन घृष्टम् ॥

चिञ्चाभिघातभीशोक रौक्ष्यादुक्तादिकासनात् ।
विरेचनञ्च वमथुः पुटपाकादिविभ्रभान् ॥२३०॥

विदग्धाहारमनान् क्षुत्तृष्णा ....णान् ।
अक्षिरोगावसाने च युञ्ज्यात्तिमिररोगजित् ॥

यथास्वं तत्र युञ्जीत दोषादीन्वीक्ष्य भेषजम् ।
धूमकाल्याम्लपित्तोष्ण विदाहक्षीरसर्पिषाम् ॥

स्निग्धं विरेचयेच्छीते जिह्वाच्छीतैश्च सर्वशः ।
गोशकृद्रसदुग्धाज्यैर्विपक्वं शस्यतेऽञ्जनम् ॥

स्वर्णगौरिकतालीसचूर्णैर्वापि रसक्रिया ।
तर्पणं क्षीरसर्पिर्भ्यां प्रशाम्यति शिराव्यथः ॥

नकुलान्धे त्रिदोषोत्थतैमिर्यविहिता विधिः ।
दध्ना विघृष्टमरिचं रात्र्यन्धेऽञ्जनमुत्तमम् ॥

सन्निवेश्य यकृन्मध्ये पिप्पलीरदहन्पचेत् ।
ताः शुष्का मधुना घृष्टा नक्तान्धेऽञ्जनमुत्तमम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

घृतसिद्धानि जीवन्त्याः पल्लवानि च भक्षयेत् ।
सिद्धं घृतं कुम्भयोनिपत्रैः पाने च पूजनम् ॥

सतैलद्रोणपुष्पाम्बु कृष्णावासशकृद्रसाः ।
कर्णविड्वाथ सक्षौद्रमञ्जनं क्षणदान्ध्यनुत् ॥

सिन्धूत्थतैलं स्तनजोषणे च शार्ङ्गेऽष्टपत्रस्य रसेन घृष्टम् ।
ताम्रेण नक्तान्ध्यमिदं निहन्यान्निम्बस्य बीजं मधुनाञ्जनं वा ॥

मुनितरुदलसंयुक्तं निशाकरकरशोषितं मरिचम् ।
पुनरपि तेन विघृष्टं प्रणुदति दोषान्ध्यजञ्जनं सहसा ॥२४०॥

गैरिकाब्जयकृत्पद्मकेसरोत्पलकेसरैः ।
दिनान्धनक्तान्धहरी चतुर्भिर्गुलिका कृता ॥

दग्धः पुटाग्निना श्रोत्रमलमाक्षिकमिश्रितः ।
क्षुद्रमत्स्यस्तथा गुञ्जामूलं वा मत्स्यमूत्रकृत् ॥

भुक्त्वा न प्रपिबेत्तोयं क्रोधशोकौ परित्यजेत् ।
वेगान्न धारयेत्सूक्ष्मं न च पश्येद्दृगामयी ॥

त्रिफलारुधिरश्रुति विशुद्धिर्मनसो निर्वृतिरञ्जनं च नस्यम् ।
शकुनासनता सपादपूजा घृतपानञ्ज सदैव नेत्ररक्षा ॥

वातात्पित्तात्कफाद्रक्तादभिष्यन्दश्चतुर्विधः ।
प्रायेण जायते घोरस्सर्वनेत्रामयाकरः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

स्यन्दे वातभवेऽल्पशोफमलतानाहश्च नासोद्भवः
भ्रूशङ्खाक्षिललाटकर्णवदने तोदश्चलावेदना ।
कृच्छ्रोन्मीलनिमीलनं प्रशमनं स्निग्धोष्णस्तर्पणम् ॥

जन्तूनामिव कण्टकैरिवचितं शीताश्रुविस्रावणं
स्यान्मन्थोयमुपेक्षया श्रुतिरिव भ्रूतालरुक्तोदकृत् ॥

तद्वस्तोऽपि हताद्वि घ इह दृङ्नाशीदृशीस्याद्व्रणः
मन्याशङ्खदृशोन्यतः प्रचलयन् सङ्कोचनोष्णो न न ।
....तोव्यतविपर्ययोपि च तथा व ....दृशं
स्यन्दे पीतकवोष्णमश्रुदवथुः धूमायितं पित्तजे ॥

मध्येङ्गारविकीर्णसन्निभयकृत्पिण्डप्रभं लोचनं
स्यन्दे पिच्छिलदूषिकाश्रुगुरुता जाड्यातिशोफः कफात् ।
मन्थे स्यान्नतकृष्णमुन्नतासितं नेत्रं रजः पूर्णवत्
....॥

रक्तेन यः स खलु पित्तसमानलक्ष्मा
स्तन्दोस्यकालहरणे (न) जपारुणेऽक्षिण ।
उत्पाटनोपमरुजे परितोऽतिताम्रे
स्पर्शाक्षमेव परिताम्यति रक्तमन्धः ॥२५०॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

कृच्छ्रोन्मीलनिमीलनं च नयनं तद्वातपित्तारुणं
शुष्कं पाकविकूणनार्तिमदयं स्छुष्काक्षिपाकः सरुक् ।
पक्वोदुम्बरसन्निभा दृगखिलैः सास्रैः सशोफाह्वयैः
पाकोष्णः स इहाल्प शोफसहितः पाकोऽल्पशोफाह्वयः ॥

सशोफदाहाविलबाष्पमक्षिण श्लेष्मोपलिप्ता सितरागयुक्तम् ।
सक्लेदशुक्लं त्वनत्रस्थितार्तिस्मृतोऽक्षिपाकाह्वय एष रोगः ॥

नीतोन्नतामन्नरसश्शिराभिः प्राप्तोऽक्षिदोषैरतिपाकयुक्तैः ।
श्यावारुणं सासृ....हशोत्र मम्लोषितस्तेन कदानिलिम्प्यात् ॥

इति षोडश निर्दिष्टा रोगाः सर्वाक्षिगोचराः ।
हताधिमन्थमेतेषु साक्षिपाकात्ययं त्यजेत् ॥

वातोद्भूतः पञ्चरात्रेण दृष्टिं सप्ताहेन श्लेष्मजातोधिमन्थाः ।
रक्तोत्पन्नो हन्ति तद्वत्त्रिरात्रान्मिथ्याचारात्पैत्तिकः सद्य एव ॥

प्राग्रूप एव स्यन्देषु तीक्ष्णगण्डूषनावनम् ।
कारयेदुपवासञ्च कोपादन्यत्र वातजान् ॥

रसाञ्जनं तथा दार्वी गैरिकैः सैन्धवान्वितैः ।
जलपिष्टैर्बहिर्लेपः सर्वनेत्रामयापहः ॥

ताम्बूलशिग्रुकरवीरशिरीषदन्ती श्यामादधित्थसुमनास्सुरसार्द्रकाणाम् ।
प्रत्येकशो मधुयुतः स्वरसाञ्जनेन कोपं नवं नयनयोः सहसैव हन्ति ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

किञ्चिल्लवणतैलाक्ता दीपतप्ताच्च पत्रतः ।
ताम्बूल्या मर्दितासारो नवाभिष्यन्दनाशनः ॥

सैन्धवेनान्वितं मूलं मायूरं ताम्रभाजने ।
मस्तुना सह सङ्घृष्टं नूतनाक्षिप्रकोपजित् ॥२६०॥

षोडशभिः सलिलपरैः पलं तथैकं सकण्टकार्याः सिद्धम् ।
सेकोऽष्टभागसिद्धः क्षौद्रयुतस्सर्वदोषकुपिते नेत्रे ॥

घृतेन दार्वीत्रिफला क्वाथसेकोऽक्षिशूलजित् ।
दार्व्याः क्षीरकषायो वा सघृतो वोरुबूजकः ॥

आरण्याच्छगणरसे पटावनद्धास्सुखिन्नां नखवितुषीकृताः कुलुत्थाः ।
तच्चूर्णं सकृदवचूर्णनां निशीथे नेत्राणां विधमति सद्य एव कोपम् ॥

सैन्धवं....मध्वाज्यभृष्टं सौवीरपिष्टं सितवस्त्रबद्धम् ।
आश्च्योतनं तं नयनस्य कण्डूदाहश्च रागश्च रुजश्च हन्ति ॥

पिप्पलीसैन्धवं दध्ना तद्वन्मर्दितमायसे ।
तैलं मरिचसङ्घृष्टमथवा नेत्रकोपजित् ॥

वातपित्तकफसन्निपातजां नेत्रयोर्बहुविधामपिव्यथाम् ।
शीघ्रमेव जयति प्रयोजितः शिग्रुपल्लवरसस्समाक्षिकः ॥

तुत्थव्योषाभयालोध्र यष्ट्याह्वैस्ताम्रसंस्थितैः ।
धान्याम्लपिष्टैः सेकोऽयं सर्वाभिष्यन्दरुक्प्रणुत् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

द्विनिशात्रिफलामुस्तैः प्रमदादुग्धकल्कितैः ।
सेकः सशर्कराक्षौद्रैश्चाभिघातरुजापहः ॥

काञ्जीकल्कितः शोफजापभ्रमभिष्यन्दमाशु नाशयति ।
कंसे मस्तु निघृष्टे दन्तैवोष्ट्रौ बहिर्लेपात् ॥

नवनवनीतसनाथं कंसे विनिघृष्टमूमेलगजम् ।
नेत्रनिक्तिं सुखयति जित्वाघमर्षा श्रुणी सहसा ॥२७०॥

कांस्य कृशोदरीनीडं नवनीतेन सर्पिषम् ।
माहिषेण बहिर्लेपादञ्जनादक्षिरोगजित् ॥

अयलिप्तचूचस्य पयसा मधु....मलिम्पेत् ।
दरमरिचतैलयुक्तपद्मामूलं तथैव लिकुचे रसे ॥

मत्स्याक्षिमूलं वासतैलदधिसैन्धवस्तन्यम् ।
तुत्थामधुकेक्षुपद्मा शङ्खामलकश्च....स्तन्यम् ॥

व....सैन्धवस्तन्यैस्सिन्धुवाररसेन वा ।
नस्यं कुर्याच्च तिमिरेऽभिष्यन्दे शूलपीडिते ॥

अङ्गनास्तनपयोभिरैष्टकं कंस्यताम्रपरिघट्टितं रजः ।
निम्बपत्रतिलमुद्गसर्पैर्धूपितं हरति नेत्र वेदनाम् ॥

तुत्थाक्षधात्रीफलम....बीज स्त्रिद्व्यैकभागैर्विदधीत वर्तिः ।
तथाञ्जयेदस्रमतिप्रवृद्ध मक्ष्णोर्हरेत्कष्टमपि प्रकोपम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

रसाञ्जनं शृङ्गबेरं मृतधातुत्थकं शुभम् ।
यथोत्तरं द्विगुणितं तैर्वर्तिरपराजिता ॥

ऋते वातादभिष्यन्दादधिमन्थाकुकूलकम् ।
पोथक्याः पिटकाः बिल्व निर्माणि च निगच्छति ॥

पथ्या तुत्थं तुल्यं मरिचं तयोरियं गुलि । ।
कौमारीति पृथिव्यां प्रथिता नत्ररोगनाशाय ॥

तुत्थं निषेचितं वाराद्गोमूत्रे पञ्चविंशतिम् ।
स्त्रीस्तन्यें छागदुग्धे वा सद्यः कोपे तदञ्जनम् ॥२८०॥

अयमेव विधिस्सर्वो (र्व) मन्थादिष्त्रभिशास्यते ।
अशान्तौ सर्वदा मन्थे भ्रुत्रोरुपरि दाहयेत् ॥

तथा ललाटे शङ्खे च स्यात्सशोफाल्पशोफयोः ।
सुस्निग्धस्य शिरात्रेधो रेकः पथ्यात्रिवृद्घृतैः ॥

आम्लोषिते प्रयुञ्जीत पित्ताभिष्यन्दसाधनम् ।
उक्लिष्टाः कफपित्तास्रनिचयोत्थाः कुकूणकाः ॥

पक्ष्मोपरोधशुष्काक्षि पाकाः पूजालसोजिनः (सः) ।
पोथक्यम्लोषितोल्पाख्या स्यन्दमन्थाद्विनानिलात् ॥

एतेऽष्टादश पिल्लाख्याः दीर्घकालानुबन्धिनः ।
चिकित्सा पृथगेतेषां स्वं स्वमुक्त्वाऽथ वक्ष्यते ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पिल्लीभूतेषु सामान्यादथ पिल्लाक्षिरोगिणः ।
स्निग्धस्य छर्दितवतश्शिराव्यधहृतासृजः ॥

विविक्तस्य च वर्त्मान्तु निर्लिखेदाविशुद्धितः ।
तुत्थकस्य पले श्वेतमरिचानि च विंशतिम् ॥

त्रिंशता काञ्जिकपलैः पिष्ट्वा ताम्रे निधापयेत् ।
पिधानपिल्लात्कुरुते बहुवर्षोत्थितानपि ॥

तत्सेकेनोपदेहान् कण्डूशोफांश्च नाशयेत् ।
सुरासुरसुनिष्पिष्ट मेवं दारुवचाधिकम् ॥

कुण्डालकाफलसलिलद्विकं सघृष्टं समेतगृहधूमम् ।
माहिषदधिसारे सैन्धवमधुतैलयुतं हिनस्ति पिल्लानि ॥२९०॥

चिञ्चानिम्बकरञ्जताललवणी कुण्डल्यलर्कोद्भव–
स्तैलव्योषहितो रसः सलवणः सक्षौद्रकर्पूरकः ।
कारञ्जेन नवेन ताम्रकमयो दण्डेन घृष्टाञ्जनं
शोफक्लेदविदाहरागजिदिदं पिल्लापहं शस्यते ॥

चिञ्चाघृष्टीमयूरी सुरसलवणिका भृङ्गमौर्वीत्र (द्यु) राणाम्
पात्रात्सारं सामांशं सदधिमधुगुडै राज्यसिन्धूत्थतैलैः ।
युक्तं कारञ्जघृष्टं स्फुटकयुतमिदं चाञ्जनं वर्त्मरोगान्
पिल्लाख्यं चामरोगं शमयति निमिना प्रोक्तमेतत्तथैव ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

चिञ्चापत्रस्वरसे परिषेको द्दषदलत्रणमृष्टांसौ ।
गुलिकीकृतार्मकण्डू ....मन्थाभिष्यन्दतिमिरपिल्लघ्नी ॥

वृन्त....मरिचे....ताशद्वांशे पिष्ट्वा तिमिर....माज्येन ।
पिल्लाविलमाज्याक्तं मासा............मालिख्यात् ॥

मधुकररसपरिभावित चेलमषीवृत्तकं सनवनीतम् ।
मूत्रे पिष्टमजायाः हन्यात्पिल्लं बहिर्लेपात् ॥

अतिपुरुषायुषमोक्षं मूलं ताम्रे निघृष्टमम्लेन ।
अञ्जनमतुल्यमखिलं हन्ति पिल्लाख्यां नेत्ररुजाम् ॥

सितकुसुमवेगगन्धामूलं ताम्रे निघृष्टमम्लेन ।
अञ्जनमतुल्यमेतत्तिमिरार्जुनवर्त्मरोगपटलेषु ॥

लाक्षानिर्गुण्डी भृङ्गदार्वीरसेन श्रेष्ठं कार्पासं भावितं सप्तकृत्वः ।
दीपं प्रज्वाल्य सर्पिषा तत्समुत्था श्रेष्ठा पिल्लानां रोपणार्थे मषी स्यात् ॥

चिञ्चाबर्बराधात्री दललिकुचफलस्याष्टशिष्टः कषायः
सारं भूयो विकल्प स्समधुशशिकणातुत्थासिन्धुस्तथान्याः ।
कार्पासक्षारशुण्ठी कणपकुनटीमालतीबर्बराणाम्
कल्कस्ताम्रेण कांस्ये कुसुमरससखः पिल्लमुन्मार्ष्टि घृष्टः ॥२००॥

वर्त्मावलेपं बहुश स्तद्वत्क्षोणितमोक्षणम् ।
पुनः पुनर्विविक्तश्च पिल्लरोगातुरो भजेत् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पूयालसे त्वशान्तेऽत्र दाहस्सूक्ष्मशलाकया ।
व्रणवच्चाक्षिरोगेषु भोज्याभोज्यानि निर्दिशेत् ॥

अपथ्यं पथ्यमप्यन्नं निशायां नेत्ररोगिणाम् ।
अन्यां तत्प्रणिनां चक्षु रुद्धरेद्यः स बाध्यते ॥

नेत्ररोगेण सौवर्णं तार्क्ष्यं माणिक्यलोचनम् ।
स्वर्णग्रैवेयकं मुक्ता वज्रवैडूर्यनासिकम् ॥

रत्नवत्पादकटकं रौप्यपक्षं सुपूजितम् ।
कृतहोमायगरुड गायत्र्या समिदादिभिः ॥

देव देव जगन्नाथ लक्ष्मीप्रिय परात्पर ।
वाहनस्य प्रदानेन तुष्टः कर्मविपाकजान् ॥

वर्त्मसन्ध्यसितश्वेत दृष्टिमण्डलजान् गदान् ।
पिल्लान्यपि जगन्नाथ नाशयाशु जगन्मय ॥ (इति दानमन्त्रः)

वयः सुपर्ण इत्याज्यहोमः कृच्छ्रातिकृच्छ्रके ।
तामेव चक्षुर्मे देहि तुष्टो भवतिसहा (य) नया ॥

वायुस्तोयविहारशीततुहिना दुध्मानकण्डूयनः
रुद्धोन्नैवपि कोपनेः श्रुतिमित....? शूलं श्रुतौ वेगवान् ।
कुर्यात्स्तम्भमर्था....दकारुजं पाकं चिरेणस्रवे
त्यक्त्वा शाल्यमकारणेन पिहिता श्शीतं विडम्बो मुहुः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पित्तेन शूले ज्वरदाहशोफा श्शीतेच्छता शीघ्रविपाकिता च ।
हारिद्रपीतां विसृजेल्लसीकां साङ्गं स्पृशेत्पाकमुपैति चैतद् ॥३१०॥

ग्रीवा शिरोगौरवमल्पतोदः कण्डूतिशोफैः कफकर्णशूले ।
चिरेण पाको भृशमुष्णकांक्षा पाकेऽश्रुभिः शुभ्रमनाविला स्यात् ॥

रक्तं प्रदुष्टमनिशं श्रवणाभिघातैः शूलं करोत्यनिलपित्तसमानलिङ्गम् ।
शूलेऽखिले श्वयथुदाहकमुष्णशीतैर्वाञ्छा सृजत्यरुणपीतसितश्च पूज्यम् ॥

वायोः क्षोभाच्छब्दनाडीष्वकस्मान्नानानादः श्रूयते कर्णनादः ।
भसाधिक्याच्छ्लेष्मवातान्वयाद्वा कृच्छ्रादुच्चैरेष बाधिर्यरोगः ॥

वातेन शोषितश्लेष्मात् स्रोतो लिम्पेत्ततो भवेत् ।
रुग्गौरवं पिधानं च सप्ततीनाह संज्ञकः ॥

कण्डूशोफौ श्लेष्मणातौतदाहौदग्धे....श्लेष्मणा कर्णरन्ध्रे ।
पूतिक्लेशो रुक्सरुक्पूतिकर्णो दोषैर्जन्तुक्षुण्णता जन्तुकर्णः ॥

दोषजे क्षतजे वापि द्विविधे कर्णविद्रधौ ।
पूर्वोक्तं लक्ष्मकर्णार्शोर्बुदयोर्वर्त्मवद्भवेत् ॥

गर्भेनिरुद्धात्सङ्कुचितोच्छष्कुलीकुचिकर्णिकः ।
पिप्पली पिप्पलीमानो गर्भे मांसाङ्कुरः स्थिरः ॥

सवर्णः सरुजः शोफः सन्निपाताद्विदारिका ।
प्रसादात्कटुतैलाभं स्रवत्कृच्छ्रेण रोहति ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शिरास्थः कुरुते वायुः पालिशोषं तथाद्वयम् ।
कृशा दृढा च तन्त्री वत्यालीवातेन तन्त्रिका ॥

कर्णास्फालमुपेक्षितस्य सहसा संवर्धनाद्वायुना
शोफस्तद्गुरणारुणार्तिसहितः पाल्यां सपोटः स्मृतः ।
उत्पातो गुरुभूरणानि भरणात्पित्तास्रतो दाहरुक्
पाकोष्णापिटकार्तिरोगसहितः शोफो शितः ....॥३२०॥

स्निग्धस्तब्धसवर्णनीरुगचलः कण्डूयुतः सर्वतः
पाल्याधातबलासजस्त्वयथुरुङ्मन्थस्तथा गल्लिकः ।
....विद्धस्य विवर्धितस्य च पुनः कर्णस्य शोफो मलः
कण्डूदाहविपाकतोदसहितः स्याद्दुःखसंवर्धनः ॥

कफासृक्क्रिमिजाः सूक्ष्माः सकण्डूक्लेदवेदनाः ।
लिंहाख्याः पिटकास्ताभिर्लिह्यापालीमुपेक्षिताः ॥

पिप्पलीसर्वजं शूलं विदारीकूचिकर्णिकः ।
एषा न साध्या याप्यैका तान्त्रिकान्याशु साधयेत् ॥

कर्णशूले पवनजे पिबेद्रात्रौ रसाशिनः ।
वातघ्नसाधितं सर्पिः कर्णं स्विन्नश्चपूरयेत् ॥

महतः पञ्चमूलस्य काष्ठान् क्षौमेन पेष्टितान् ।
तैलाभ्यक्तान् प्रदीपाग्रान् स्नेहः सद्योरुजापहः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

योज्यं चैवं भद्रकाष्ठात्कुष्ठात्काष्ठाच्च सारलात् ।
रसोत्रार्कदलच्छन्ना पुटपकाद्रसोनतः ॥

सपदि तु सर्षपतैलं शमयति कर्णोद्भवं शूलम् ।
सुरतरुसर्षप तैलं तैलं वा सिन्दुवाररसम् ॥

तीव्रशूलार्दिते कर्णे सशब्दोत्क्लेदवाहिनि ।
बस्तमूत्रं क्षिपेत्कोष्णं सैन्धवेन समन्वितम् ॥

पित्तशूले सितायुक्तं घृतस्निग्धं विरेचयेत् ।
द्राक्षायष्टियुतं स्तन्यं शस्यते कर्णपूरणम् ॥

वामयेत्पिप्पलीसिद्धं सर्पिस्सिद्धं कफोद्भवे ।
धूमनावनगण्डूष स्वेदान्कुर्यात्कफावहान् ॥२३०॥

लशुनार्द्रकशिग्रूणां मुरंग्या मूलकस्य च ।
कदल्याश्च रसः श्रेष्ठः कदुष्णः कर्णपूरणे ॥

अर्काङ्कुरानम्लपिष्टान् तैलाक्तान् लवणान्वितान् ।
निधाय स्नुहिकां ....॥

स्वेदयेद्गुडपाकेन सरसश्शूलजित्परम् ।
अजादिमूत्रे वंशत्वक्सिद्धं तैलञ्च पूरणम् ॥

सिद्धं वा सर्षपं तैलं हिङ्गुतुम्बुरुनागरैः ।
रक्तजे पित्तवत्कार्यं शिरांचाश्रु विमोचयेत् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पक्के पूयवहे कर्णे धूमगण्डूषनावनम् ।
युज्यान्नाडीविधानञ्च दुष्टव्रणहरञ्च यत् ॥

नादबधिर्ययोः कुर्याद्वातशूलोक्तमौषधम् ।
बाधिर्यं बालवृद्धानां कासिनां दोषिणां त्यजेत् ॥

पचेद्बिल्वशलाटूनि गोमूत्रे तेन साधयेत् ।
युक्तं क्षीरेण कल्केन सितामधुकबीजयोः ॥

तैलं कदुष्णशीतेन बिल्वक्वाथेन मन्थयेत् ।
यावद्घनीभवेदेतत्पुनरन्यत्र मन्थयेत् ॥

उद्धृत्य दुग्धेऽष्टगुणे यष्टीचन्दनकल्कवत् ।
तत्साधितं हरत्याशु बाधिर्यं कर्णपूरणात् ॥

पक्वं प्रतिविषाहिङ्गु निशात्वक्स्वर्चिकोषणैः ।
सशङ्खैः पूरणं तैलं रुक्स्रावश्रुतिनादनुत् ॥२४०॥

कर्णनादे हितं तैलं सर्षपोत्थं च पूरणे ।
शुक्लमूलकमूलानां क्षारो हिङ्गुमहौषधम् ॥

शतपुष्पावचाकुष्ठदारुशिग्रुरसाञ्जनम् ।
सौवर्चलयवक्षारस्वर्चिकोद्भिदसैन्धवम् ॥

भूर्जग्रन्थिविडं मुस्ता मधुशुक्तं चतुर्गुणम् ।
मातुलुङ्गरसस्तद्वत्कदलीस्वरसश्च तैः ॥

(६)

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पक्वं तैलं जयत्याशु सुकृच्छ्रानपि पूरणात् ।
कण्डूक्ष्वेडनबाधिर्यपूतिकर्णकरुक्क्रिमीन् ॥

क्षारतैलमिदं श्रेष्ठं मुखदन्तामयेषु च ।
तथा च तैलं दध्याजमूत्रबिल्वफलैः शृतम् ॥

निर्गुण्डीरविशिग्रुमौर्वितुलसी धुत्तूरतारस्नुही–
रम्भाबर्बरकारवेल्लबृहती घृष्ट्यार्द्रकात्पीलुभिः ।
जातीसोमलताविमूलकनिशा गोकर्णकानां रसे
लुङ्गाम्ले दधिमस्तुबस्तजलयोः शुक्ला च तालाम्लयोः ॥

क्षारे कर्कटकस्य च प्रतिविशा व्योषावराह्वामयै–
र्मांसीगुग्गुलुहिङ्गुसर्जतगरैः ज्योतिर्वचासैन्धवैः ।
पुत्पण्डासुरिकातुरुष्कलशुनैर्यत्साधितं सार्षपं
तैलं लुम्पति पञ्चविंशतिमपि श्रोत्रामयान् पूरणात् ॥

यदि सुप्ता विवस्यांतां कर्णे रक्तं हरेत्ततः ।
सशोफक्लेदयोर्मन्दश्रुतेर्वमनमाचरेत् ॥

प्रतीनाहे परिक्लेद्यस्नेहस्वेदैर्विशोधयेत् ।
कर्णशोधनकेनापि कर्णं तैलेन पूरयेत् ॥

सशुक्लसैन्धवमधोर्मातुलुङ्गरसस्य वा ।
शोधनारुक्क्षतोत्पत्तौ घृतं मण्डस्य पूरणम् ॥३५०॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

क्रमोऽयं मलपूर्णोऽपि कर्णकट्वां कफावहम् ।
नस्यादि तद्वच्छोफेन कदुष्णैश्चापि लेपनम् ॥

कर्णस्रावोदितं कुर्यात्पूतिक्रिमिणि कर्णयोः ।
सक्षौद्रं सैन्धवे बस्त मूत्रार्धकनिशारसैः ॥

सतैलागुरुधूमेन सिन्दुवाररसेन वा ।
पूरणं पूतिकर्णघ्नं तथा गुग्गुलुधूपनम् ॥

पूरणं कटुतैलेन विशेषक्रिमिकर्णके ।
वमिपूर्णवाहिना कर्णविद्रधौ विद्रधिक्रियाम् ॥

तरुणककार्पासफलं....विपाच्य तद्बिन्दून् ।
श्रवसि निदध्याद्वित्रा न्यदि वाञ्छतिपूयमुन्मार्ष्टुम् ॥

पित्तोत्थकर्णशूलोक्तं कर्तव्यं क्षतविद्रधौ ।
अर्शार्बुदेषु नासावदामकर्णविदारिका ॥

कर्णविद्रधिवत्साध्या यथा दोषोदये न तु ।
पालिशोथेऽथ श्रोत्रशूलवन्नस्यनावनम् ॥

स्वेदं च कुर्यान्नस्यं च पालिमुद्वर्तयेत्तिलैः ।
प्रियालबीजयष्ट्याह्वहयगन्धायवन्वितैः ॥

ततः पुष्टिकरस्नेहैरभ्यङ्गं नित्यमाचरेत् ।
शतावरी वाजिगन्धा पयस्येरण्डबीजकैः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तैलं विपक्वं सक्षीरं पालिना पुष्टिकृत्परम् ।
उदितं वा घृतक्षीरमलसीकन्दसाधितम् ॥३६०॥

माहिषं नवनीतं वा सतिलं तैलमेव वा ।
आज्यं दाडिमकल्केन भूकदम्बरसे शृतम् ॥

पालिं छित्वा तु संक्षीणां शेषां सन्धाय पोत्रयेत् ।
याप्यैवं तन्त्रिकाल्यापि परिपोटेऽप्ययं विधिः ॥

उत्पाते शीतलैर्लेपो जलूकाहृतशोणितम् ।
उन्मन्थेऽभ्यञ्जनं तैलं गोधाकर्णवसान्वितम् ॥

तालपत्त्र्यश्वगन्धार्कवाकुचीफलसैन्धवैः ।
सुरसालाङ्गलीभ्यां च सिद्धं तीक्ष्णं च नावनम् ॥

दुर्विद्धेश्मन्तजम्ब्वाम्र पत्रक्वाथेन रोपिताम् ।
तैलेन पालिं स्वभ्यक्तां सुश्लक्ष्णैरवचूर्ण येत् ॥

चूर्णैर्मधुकमञ्जिष्ठा प्रपुण्डाह्वनिशोद्भवैः ।
लाक्षाविलङ्गसिद्धं च तैलमभ्यञ्जने हितम् ॥

खिन्नाङ्गो....यजैः पिण्डैर्बुहुशः परिलेहकाम् ।
विलङ्गसारैरालिम्पेदुरभ्रीमूत्रकल्कितैः ॥

कुटजेङ्गुदकारञ्ज बीजश्यामाकवल्कलैः ।
सुनिम्बपत्रमदन मरिचैर्लेजिकाव्रणम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

स्नानान्यवारिहिमजागरणोच बाष्प

नीचोपधानवमनासुनिरोदशीतैः ।

क्रुद्धा मला नसि नृणामनिलोल्बणास्ते

कुर्वन्ति पीनसपुरस्सररोगपूगान् ॥

वक्त्रोपशोषणभुजक्षवदूर्ध्वतोद-

घ्राणोपरोधशिशिराश्च कफस्रवाः स्युः ।

कीटप्रसर्पणमिव श्रुतिनादसादौ

पाकश्चिरात्पवनजे सति पीनसेऽस्मिन् ॥३७०॥

नासाग्रपाकपिटकाज्वरतृड्भ्रमाः स्युः

पीतोष्णताम्रकफनिःसृतयश्च पित्तात् ।

कासोरुचिश्वसनदेहगुरुत्ववक्त्र-

माधुर्यशुक्लकफनिःसृतयः कफेन ॥

सर्वोद्भवे भृशमकारणवृद्धिशान्ति

दुष्टास्रजे श्वसनपूत्यरुणेक्षणत्वम् ।

वक्षः स्थलस्तिमितता श्रुतिनेत्रनासा

कण्डूश्च पित्तभवपीनसलिङ्गमाहुः ॥

एतेषामनुपक्रमात्प्रबलता दुष्टप्रतिष्ठापरुक्

स्रोक्तोपद्रवगौरवेण कुरुते सर्वेन्द्रियध्वंसनम् ।

नासाक्लेदविशोषशोफकसनश्वासज्वरारोचकान्

पूयाभासितलोहितस्रुतिकफः कुप्यत्यकस्मादपि ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वायुर्निवृत्य तरुणास्थिविघट्टनेन शृङ्गाटकान् प्रकुपितः क्षवथून् करोति ।
सोऽयं भृशक्षवगदः पुटकस्थपित्तश्लेष्मावरुद्धपवनेन कफः पुटात्मा ।।

नासाशोषः श्लेष्मदोषः समीरान्नासां नीहरश्लेष्मणा वातरोधः ।
त्वङ्नास्याकः पित्ततोघ्राणपाको दीप्तिस्त्रास्नादुच्छ्वसेध्दूमतुल्यम् ।।

नासास्राव श्रुतिस्रावो नासापां श्लेष्मसम्भवाः ।
अच्छो जलोपमो....स्रं विशेषान्निशि जायते ।।

दोषैस्तालुतलाश्रयैः प्रकुपितो दुर्गन्धवाही मरु–
न्निर्गच्छेन्मुखनासिकात्कफयुतो स्यात्पूतिनासो गदः ।
कृच्छ्रे श्लेष्मणि पित्तसाधिकरुजाश्चापीनसोनासिका
प्रक्लिन्ना विसृजत्पवेरिवकफा पीतं घनं पिच्छिलम् ।।

निचयादभिघाताद्वा पूयास्रं नासिका स्रवेत् ।
तत्पूयरुक्समाख्यातं शिरोरुहरुजाकरम् ।।

सर्वेषु पीनसाद्यादौ निवातावारगो भवेत् ।
स्नेहनस्वेदवमन धूमगण्डूषधारणम् ।।

लघ्वन्नास्निग्धलवणमुष्णं भोजनमेद्रवम् ।
ध....मांसगुडक्षीर चणकाम्रिकटूत्कटम् ।।३८०।।

बालमूलकनिर्यूहं यूषश्चापि कुलत्थकम् ।
पिबेच्च नारिकेलाम्बु हरिद्रानागरान्वितम् ।।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

गुडार्द्रकदधिव्योष क्षीरजामिषमत्स्यभुक् ।
घृताक्तसक्तधूमञ्च पिबेद्दोषशुद्धये ॥

व्योषतालीसजविका तिन्त्रिणीकाम्लवेतसम् ।
साग्निजाजीद्विपलिका एलात्वक्पत्रयूथकम् ॥

जीर्णा गुडा तुलार्धेन पक्केन वटुकीकृतम् ।
पीनसश्वासकासघ्नं रुचिस्वरकरं वरम् ॥

त्यजेत्स्नानं रुचिं क्रोधं भृशं शय्या हिमं जलम् ।
आमलक्यभया कृष्णा चविकाचित्रनागरैः ॥

हरीतक्यन्वितः क्वाथः प्रतिश्यायाग्निमान्द्यजित् ।
पिप्पलीचूर्णसंयुक्तो निशानागरसाधितः ॥

क्षुद्रामृता नागरतीक्ष्णसिद्धं महौषधोत्थं लशुनोद्भवं वा ।
मण्डूकपर्णी मरिचोद्भवं वा क्काथं पिबेद्वापि च वत्सकादेः ॥

पिबेद्वा तत्प्रतिश्याये सर्पिर्वातघ्नसाधितम् ।
स्वेदनस्यादिकं कुर्याच्चिकित्सामर्दितोदितम् ॥

पित्तरक्तोत्थयोः पेयं सर्पिर्मधुरकैः शतम् ।
परिषेकान् प्रलेपांश्च शीतैः कुर्वीत शीतलान् ॥

कफजे लङ्घनं लेपः शिरसो गौरसर्षपैः ।
कटुतीक्ष्णैर्घृतैर्नस्यैः कवलैः सवर्जि जयेत् ॥३९०॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

परस्रोताभिघाताद्वा कर्णनासारुजोद्भवम् ।
स्यात्तत्र होमो व्याहृत्य कृच्छ्रान्यद्यद्द्चो जपः ॥

।

वस्त्रादिदानं दद्यात्तु कर्णरोगेषुकम्बलम् ॥

मत्स्यक्रोडपलाममूलकदली क्षीरेक्षुमा।सवा
शुक्तं.... पघणितशीतवीरिभजतः शय्यां तथाधोमुखम् ।
धूमञ्छर्दिशिराव्यधान भजतो गण्डूषमाधाचितो
दोषान् श्लेष्मसमुल्बणान् खलु गदानन्तर्मुखं कुर्वति ॥

ओष्ठो महारुक्पवनाद्विर्तीर्णाः कार्कश्यपारुष्ययुता सिता स्यात् ।
तीक्ष्णासहः शीघ्रविपाकदाहः पीतस्फुटे क्लिद्यत एव पित्तात् ॥

ओष्ठो गुरुर्नसजते शिशिरस्य शोफः स्यार्वाक्सवर्णपिटकोपचितः कफेन ।
दुर्गन्धपिच्छिलनिलो निचयादकस्माद् वृद्धिक्षयाविषमपाकरुजो विवर्णः ॥

ओष्ठौ रक्तार्दितौ रक्तौ स्रवते रक्तसन्निभौ ।
मांसपिण्डोपमौ मांसौ स्यातां मर्शक्रिमिक्रमात् ॥

क्षतजाववदीर्णे ते पाथेते च सकृत्पुनः ।
तैलाभः श्वयथुः क्लेदौ भवेत्तां मेदसां मृदु ॥

खण्डोष्ठ इत्यनिलतोऽधर एव भिन्ने खर्जूरसन्निभमिजार्बुदमत्तशेषात् ।
ओष्ठे तु बुद्‌बुदनिभं कफवातकोपाद्यत्तज्जलार्बुदमुदीर्यतमागमज्ञः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

इत्येकादशरोगाः स्युरोष्ठरोगास्तेषु वर्जयेत् ।
अर्बुदं मांसरक्तोष्ठा ओष्ठाकोपश्च सर्वजम् ॥

महास्नेहेन वातोष्ठे सिद्धे वाक्तः पिचुर्हितः ।
वेददालिमधूच्छिष्ठ गुग्गुल्वगुरुदारुभिः ॥१००॥

यष्ट्याह्वचूर्णयुक्तेन तैलेन प्रतिसारणम् ।
नात्युष्णं स्वेदयेद्दग्धं सिद्धैरेरण्डपल्लवैः ॥

खण्डोष्ठविहितं तस्य नस्यं मूर्ध्नि च तर्पणम् ।
पित्ताभिघातजावोष्ठौ जलूकाभिरुपाचरेत् ॥

लोध्रस्य च रजः क्षौद्रमधुकैः प्रतिसारणम् ।
गुडूचीयष्टिपत्तङ्ग सिध्दमभ्यञ्जने घृतम् ॥

दार्वीकमलमञ्जिष्ठजीवन्तीतुत्थसिक्थकैः ।
स्निग्धं दुग्धं क्षतोष्ठघ्नं यद्वा तैलाज्यफाणितम् ॥

सिद्धं वमन........ हेमगैरिकसैन्धवैः ।
पित्तविद्रधिवच्चार्द्र कर्मोष्ठे कफोरुरे (?) ॥

पाठाक्षारमधुव्योषैर्हतास्ते प्रतिसारणम् ।
धूमनावनगण्डूषाः प्रयोज्याश्च कफच्छिदः ॥

नकटानिम्बनिर्गुण्डीस्वरसेन विपाचितम् ।
निशाकल्कयुतं तैलमोष्ठरोगनिवारणम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

छिन्नं भिन्नं विभेदक्यं दहेन्मेदोजमष्ठि न ।
प्रियङ्गुलोध्रत्रिफलामाक्षिकैः प्रतिसारयेत् ॥

स्यन्दोष्ठस्य विलिख्यादौ सत्वा व्रणवदाचरेत् ।
यष्टी ज्योतिष्मती लोध्रस्रावणी शारिबोत्पलैः ॥

पटोल्या काकमाच्या च तैलमभ्यञ्जनं पचेत् ।
नस्यश्च तैलवातघ्नं मधुरस्कन्धसाधितम् ॥४१०॥

सक्षौद्रवर्षणं तीक्ष्णैर्भिन्नैः शुद्धे जलार्बुदे ।
अवगार्च्छति वृद्धे वा क्षारोऽग्निर्वा प्रतिक्रिया ॥

गण्डालजीस्थिरः शोफो गण्डो दाहज्वरान्वितः ।
आमादेवस्थ खलघ्नी गण्डशोफवदाचरेत् ॥

वात उष्णसहा दन्ता शीतस्पर्शाधिकव्यथाः ।
दाध्यन्त इव शूलेन शीताख्यो दाधनश्च सः ॥

दन्तहर्षे प्रतानाम्ल शीतभक्ष्याक्षमाद्विजाः ।
भवत्यम्लाशनेनैव सरुद्धश्चलिता इव ॥

दन्तभेदे द्विजस्तोदभेदरुक्पुटनान्विताः ।
चलस्खलद्भिर्दहनैर्भक्षणादधिकव्यथैः ॥

करालस्तु करालानां दशनानां समुद्भवः ।
श्यावः श्यावत्वमायातो रक्तपित्तानिलैर्द्विजः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

दन्ताधिकोधिदन्ताख्यस्स चोक्तः स्खलत्वर्धनः ।
जायन्ते जायमानेति रुञ्जाते तत्र शाम्यति ॥

अक्षालनास्थिरविगन्धिमलः कफो वा
शुष्कोऽनिलेन दशने यदि शर्करासौं ।
संशान्तयेद्द्वकपालमुपेक्षितैव
सा शर्कराणुतरमेव क....लिका स्यात् ॥

सौषिर्यमुत्कटुमरुत्कृतमज्जशोफा
दन्तस्ततोन्नमलपूरितपूतिगन्धिः ।
शूनीतनुक्रिमितरः क्षरदस्रपूय
स्सोनं च शूनकणदः क्रिमिदन्तकश्च ॥

दशैवं दन्तजा रोगास्तेषु श्यावकरालकौ ।
त्याज्यौ घर्षस्तु याघस्या द्भेदः स्यात्पुटिते रदे ॥४२०॥

खिन्नत्य शीतदन्तस्य पालिं विलिखितां दहेत् ।
तैलेन प्रतिसार्याथ सक्षौद्रघनसैन्धवैः ॥

दाडिमत्वग्वराताक्ष्र्य कान्ताजम्ब्वस्थिनागरैः ।
कबलं क्षीरिणीक्वाथैः (अ) रणुतैलश्च मानवम् ॥

दन्तहर्षे दन्तभेदे सर्ववातहराः क्रियाः ।
सस्नेहदशमूलाम्बुगण्डूषं प्रचलद्विजे ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मदिरासनलोहमला त्रिफलाकक्कतैररिमेदयुतैः ।
सलिलं क्वथितं तिलतैलयुतं दृढयत्यचिराच्चलितं दशनम् ॥

तैलं पक्वं समतलपोटरसं नारिकेलदुग्धभवम् ।
वयसि गलिता दन्ता गण्डूषयतो न विगलन्ति ॥

अधिदन्तकमालिप्तं यदा क्षारेण कर्कशम् ।
क्रिमिदन्तमिवोत्पाट्या तद्वच्चोपचरेत्तथा ॥

अनवस्थितरक्ते च दग्धे व्रण इव क्रिया ।
अहिंसन् दंतमांसानि दन्तेभ्यः शर्करां हरेत् ॥

क्षारचूर्णैर्मधुयुतै स्ततश्च प्रतिसारयेत् ।
कफादिकायमप्येवं हर्षोक्तं वासमाचरेत् ॥

जयेद्विस्रावणैः स्विन्न माविलं क्रिमिदन्तकम् ।
स्निग्धैश्चालेपगंण्डूष नस्याहारश्चलापहैः ॥

गुडेन पूर्णं सुषिरं मधूच्छिष्टेन वा दहेत् ।
सप्तच्छदार्कक्षीराभ्यां पूरणं क्रिमिशूलजित् ॥४३०॥

क्षौद्राज्यकृष्णा वदनेन धार्याः शूले द्विजानामथ वाकुचीनाम् ।
कल्कं तथा हिङ्गुसुखोष्णमत्र चलेद्विजानां बकुलास्थितद्वत् ॥

शृङ्गबेरविडङ्गानि माणिमन्थश्च जीरकम् ।
सम्पेष्य मधुतैलाभ्यां दन्ताग्रे सन्निधापयेत् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सति महति द्विजशूले तदुपरि संस्थाप्य रामठं विदहेत् ।
रदमिह गण्डीरोत्थ क्षारेण विमर्दयेदथवा ॥

रामठलवणोपेतं तैलं यन्नारिकेलस्य ।
तलपोटकरसपक्वं चलरदशूलापहं सद्यः ॥

काञ्जिकपिष्टं सायकपुङ्खामूलं विलिप्य रदमूले ।
तैलाक्ताम्रपता पितजा क्रिमयो विनिर्यान्ति ॥

चलन्तं वा पतन्तं वा बलवद्वेदनान्वितम् ।
दन्तमुद्धृत्य तन्मूलं तैलाग्निभ्यां समाचरेत् ॥

कृशादुर्बलवृद्धानां वातार्तानाञ्च नो हरेत् ।
नोद्धरेच्चोत्तरं दन्तं बहूपद्रवकृद्धि सः ॥

एषामप्युद्धरेत्स्निग्धस्वादुशीतक्रमो हि सः ।
फलान्यम्लानि शीताम्बु रूक्षान्नं दन्तधावनम् ॥

तथातिकठिनान् भक्ष्यान् दन्तरोगी विवर्जयेत् ।
दन्तमूलगता रोगा वक्ष्यन्तेऽथ त्रयोदश ॥

पूत्यस्रं विसृजन्ति सास्रमसितक्लिन्नानि मांसान्मलं
सङ्कीर्णानि मृदूनि रक्तकफतो कसाञ्छिदो गदः ।
वाताच्छोणितपित्ततोह्युपकुशो दन्तामिषं दह्यते
रक्तं कण्डुरमस्रवाहिदशनाश्चञ्चान्तिपूत्यास्यताम् ॥ ४४० ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

दन्तयोस्त्रिषु वा शोफो बदरास्थिनिभो घनः ।
कफेनातीव रुक्शीघ्रं पच्यते दन्तपुप्फुटः ॥

दन्तमांसे मलैः सास्रै र्बाह्यान्तः श्वयथुर्गुरुः ।
सरुग्दाहः स्रवेद्भिन्नः पूयास्रं दन्तविद्रधिः ॥

श्वयथुर्दन्तमूले तु रुजावान् रक्तपित्ततः ।
लालास्रावी च सुषिरो दन्तमांसप्रशातनः ॥

स सन्निपातज्वरवान् सपूयरुधिरस्रुतिः ।
महासुषिर इत्युक्तो विशीर्णद्विजबन्धनः ॥

दन्तान्ते कीलवच्छोफो हनुकर्णरुजाकरः ।
प्रतिहन्त्यभ्यवहृतिं श्लेष्मणा सोऽधिमांसकः ॥

घृष्टेषु दन्तमांसेषु संरम्भो जायते महान् ।
तस्मिंश्चलन्ति दन्ताश्च स वैदर्भोऽभिघातजः ॥

यो दन्तमूलभवरोगमुपेक्षितं तद्दोषस्रवद्गतिमसौ जनयेत्सुसूक्ष्माम् ।
त्वङ्मांसगा स्रवति पूयमियं स्वलिङ्गैः स्यात्पञ्चधा मलचयः क्षतसम्भवेपि ॥

स्यान्महासुषिरस्तेषु त्याज्यो नाडी च सर्वदा ।
विस्रावितास्रे शीतार्दे सक्षौद्रप्रतिसारणम् ॥

मुस्तार्जुनत्वक्त्रिफलाफलिनीतार्क्ष्यनागरैः ।
तत्क्वाथः कवलो नस्यं तैलं मधुरसाधितम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

दन्तमांसान्युपक्रशेत्स्विन्नानुष्णाम्बुधारणैः ।
मण्डलाग्रेण शूकादिपत्रैर्वा बहुशो लिखेत् ॥४५०॥

ततश्च प्रतिसार्याणि घृतमण्डमधुद्रुतः ।
लाक्षाप्रियङ्गुपत्तङ्ग लवणोत्तमगैरिकैः ॥

सकुष्ठशुण्डीमरिचयष्टीमधुरसाञ्जनैः ।
सुखोष्णो घृतमण्डेन तैलं वा कवलग्रहः ॥

घृतञ्च मधुरैः स्निग्धं हितं कवलनस्ययोः ।
दन्तपुप्फुटके स्विन्ने छिन्ने भिन्ने विलेखिते ॥

यष्ट्याह्वस्वर्चिका शुण्डी सैन्धवैः प्रतिसारणम् ।
विद्रधौ कटुतीक्ष्णोष्णरूक्षैः कमललेखनम् ॥

घर्षणं कटुकाकुष्ठ वृश्चिकौलेयको द्रवैः ।
रक्षः (जः) पाकं हिमैः पक्वं पाथोह्योवगाढकः ॥

सुषिरैः स्विन्नलिखिते सक्षौद्रैः प्रतिसारणम् ।
लोध्रमुस्ता निशि श्रेष्ठा तार्क्ष्यपत्तुङ्गकिंशुकैः ॥

सकदफलैः कषायश्च तेषां गण्डूष इष्यते ।
छित्वाधिमांसकं चूर्णैः सक्षौद्रैः प्रतिसारयेत् ॥

वचा तेजोवती पाठा स्वर्चिकापावशूकजैः ।
पटोलनिम्बत्रिफलाकषायः कवलो हितः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

विदन्तदन्तशूलानि मण्डलाग्रेण शोधयेत् ।
क्षारं युञ्ज्यात्ततो नस्यं गण्डूषादि च शीतलम् ॥

संशोध्योभयतः कायं शिरश्चोपचरेत्ततः ।
नाडीदन्तानुगादन्तं समुध्दृत्याग्निना दहेत् ॥४६०॥

वचा तेजोवती चूर्णं मुडेन मदनेन वा ।
धावनं जातिमदन खादिराखादुकण्टकैः ॥

क्षीरवृक्षाम्बुगण्डूषो नस्यं तैलञ्च तच्छृतम् ।
पुंसकाथभयाकल्के सिद्धं तैलं हृतार्तिहृत् ॥

नागरस्य तुले स्यातां स्यात्तुला चित्रकत्वचः ।
देवदारु तदर्धं स्यात्तदर्धं द्विकरञ्जकम् ॥

मुस्तारिमेद त्रिफला चित्रदन्त्यर्कगुग्गुलुः ।
तदर्धं चोपसंगृह्य द्विद्रोणसलिले पचेत् ॥

कार्षिकैर्द्विगुणक्षीरं तत्र तैलाढकं पचेत् ।
शटीपुष्करशार्ङ्गेष्ठा हपुषापिप्पलीत्रयैः ॥

भार्गीरास्नामधूच्छिष्ट निशाद्वयवचाम्बुदैः ।
चतुर्जातकमाञ्जिष्ठचन्दनागुरुपद्मकैः ॥

तज्जयेत्पानगण्डूष नस्याद्यैर्वदनामयान् ।
पतितानाञ्च दन्तानां भ.... बध्नाति तत्पदम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तुलाया वल्कलं नाति वृद्धबालारिमेदसः ।
चतुर्णां क्षीरिवृक्षाणां तुलाया वल्कलस्य च ॥

सिद्धे....पां पादस्थे क्षीरलाक्षारसान्विते ।
मञ्जिष्ठामिशिशार्ङ्गष्ठा लोध्रश्रीफलकट्फलैः ॥

शतपुष्पा शिलापुष्पा धातकीपुष्पपुष्करैः ।
चन्दनत्रयगायत्री पद्मकिञ्जल्कपद्मकैः ॥४७०॥

मदयन्ती मधूच्छिष्ठ मधुयष्टे फलत्रयैः ।
कर्पूरोशीरकस्तूरी मृणालवकुलोत्पलैः ॥

जातीरसजक ....समङ्गागिरिमृद्वलाः ।
.... द्विनिंशाशारिवाह्वयैः ॥

सिद्धं तैलं हि तन्नस्यं पानाभ्यञ्जनवस्तिषु ।
विशेषाद्वदने धार्यं कत्रोष्णं त्रिकटूत्कटम् ॥

जिह्वागण्डोष्ठरोगघ्नं त्रिशेषाद्विनियच्छति ।
दन्तानां चलनं शूलं विश्लेषञ्च त्रिवेष्टनात् ॥

पाठादार्वीत्वक्कुष्ठमुस्तासमङ्गा तिक्ता पीताङ्गी लोध्रतेजोवतीनाम् ।
चूर्णः सक्षौद्रा दन्तमांसा त्रिकण्डू पाकास्रावाणां नासिकाघर्षणे वा ॥

सुप्ता जिह्वायां कर्कशाः प्रस्फुटन्तो मांसाङ्कुराः स्युः कण्टकः स्यात्समीरे ।
पित्ते दाहो वा संयुतः शोणवर्णः श्लेष्मण्युद्रिक्तः शाल्मलीकण्टकाभाः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

कफपित्तादधः शोफाज्जिह्वास्तम्भकृदुन्नतः ।
मत्स्यगन्धी भवेत्पक्वः सोऽलसो मांसशातनः ॥

मूलेऽधः कफपित्तरक्तजनितो जिह्वाग्रवत्कण्डुरो
वाक्याहारविघातकृद्भृशरुजः शोफोऽधिजिह्वामयः ।
जिह्वा...................... मत्रोपजिह्वामय–
स्तेषां नोपचरेत्पुराणमलसं पक्वोपजिह्वानपि ॥

कुर्याद्वातोत्थकोपोक्तं कण्टकेष्वनिलात्मसु ।
जिह्वायां पित्तजातेषु ओष्ठेषु रुधिरे स्रुते ॥

प्रतिसारणगण्डूषनावनं मधुरैर्हितम् ।
तीक्ष्णैः कफोत्थेष्वेवञ्च सर्षपव्यूषणादिभिः ॥४८०॥

नवजिह्वालसेप्येवं तन्तुशस्त्रेण स स्पृशेत् ।
उन्नाम्य जिह्वामाकृष्टां बडिशेनाधिजिह्विकाम् ॥

छेदयेन्मण्डलाग्रेण तीक्ष्णोष्णैर्घर्षणानि च ।
उपजिह्वां परिस्राव्य यवक्षारेण घर्षयेत् ॥

जिह्वारोगेषु सर्वेषु शिरां विध्येत्तदाश्रयाम् ।
हरेद्रक्तं जलूकाभिस्तोदशोफप्रशान्तये ॥

शिला सदार्वी पटुयावशूक निशावरागोक्षुरमाक्षिकाभ्याम् ।
वक्त्रेण धार्याद्विजमूलकण्ठ जिह्वोष्ठताल्वामयजित्प्रयोगः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

व्याघ्रीबलामृताबिल्वतुलसीदेवदारुभिः ।
कषायः क्षौद्रसंयुक्तो जिह्वारोगप्रणाशनः ॥

निर्गुण्डी मरिचीभृङ्गजातीनां स्वरसाढके ।
कर्षांशैर्मागधीशिग्रु क्षारसैन्धवनागरैः ॥

हिङ्गुपाठाग्निमन्थोग्रा भार्ङ्गीसिद्धार्थकुङ्कुमैः ।
तैलप्रस्थं हरेत्सिद्धं जिह्वारोगानशेषतः ॥

तालुमांसोऽनिलाद्दुष्टे पिटकाः सरुजाः खराः ।
बह्व्यो घनस्रावयुतास्तास्तालुपिटकाः स्मृताः ॥

पद्माकृतस्तालुमध्ये रक्तश्वयथुरर्बुदम् ।
कच्छपः कच्छपाकारश्चिरवृद्धिकफातिरुक् ॥

श्लेष्मासृग्भ्यां तालुमूलात् प्रवृद्धो दीर्घः शोफो ध्मातवस्तिप्रकाशः ।
तृष्णाकासश्वासकृत्तं वदन्ति व्याधिं वैद्याः कण्ठशुण्डीति नाम्ना ॥४९०॥

मध्ये तालुपथं चितं यदि भवेत्सा संहतिर्नीरुजा
मेदः श्लेष्मसमुद्भवा बदरवच्छोफोऽन्यथः पुप्फुटः ।
पाकः पित्तभवस्सपूयभृशरुक्स्यात्तालुपाकामयः
शोषः पित्तमरुक्समज्वरभवः स्यात्तालुशोषामयः ॥

तालुन्यष्टौ त्यजेत्तेषु पिटकार्बुदकच्छपाः ।
कफघ्नैः शुण्डिका साध्या नस्य गण्डूषघर्षणैः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

उर्वारुबीजप्रतिमं वृद्धायामशिराततम् ।
अग्रं निविष्टं जिह्वायां बडिशाद्यवलम्बितम् ॥

छेदयेन्मण्डलाग्रेण नात्यग्रे न च मूलतः ।
तिक्ता व्योषाग्निसिन्धूत्थ वचाज्योतिर्निशामयैः ॥

अगारधूमैः सक्षौद्रैर्धर्षयेद्गलशुण्डिकाम् ।
सञ्जाते पुष्फुटे कूर्मे विलिख्यैवं समाचरेत् ॥

अपक्वे तालुपक्वे तु कासीसक्षौद्रताक्ष्र्यजैः ।
घर्षेण कवलः शीतकषायमधुरौषधैः ॥

पक्वेष्टापदवच्छिन्ने तीक्ष्णोष्णैः प्रतिसारणम् ।
वृषनिम्बपटोलाद्यैस्तिक्तैः कवलधारणम् ॥

तालुशोषे त्वतस्तस्य सर्पिषोत्तरभक्तिकम् ।
कणा शुण्ठी शृतं पान मम्लैर्गण्डूषधारणैः ॥

जिह्वायां गलमार्गरोधजननी मांसाङ्कुरारोहिणी
सा वाताद्धनुकर्षशूलजननी कण्ठस्य शोषप्रदा ।
क्षिप्रोत्था च विपाकतृड्ज्वरवती पित्तात्कफात्पिच्छिला
रक्तास्फोटकिता जपाकुसुमवद्गम्भीरपाकाखिलैः ॥

वृन्दः कीलो वर्तुलभङ्गो गलपा तुण्डीकेरीनग्नजिदाभा हनुसन्धौ ।
एको मेकोषामलकास्थीव गिलायुः कण्ठे शालुककोलफलसमशूकैः ॥५००॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

ओष्ठोन्तर्बहिरर्गले च सरुजा हार्भिः सदाघोन्नतः
शोफः स्याद्वलयोर्गलादिरसनाग्रेरुग्विपाकोर्बुदम् ।
वर्तिव्यापलाङ्कुरज्वरतृषा शूलैः शतघ्न्यान्विता
च्छ्लेष्मार्तात्स्वरकण्ठशोषसहित श्वासास्वरघ्नोऽनिलात् ॥

व्याप्तः सर्वगलः शीघ्रजन्मपाके महारुजः ।
पूतिपूयनिभास्रावा श्वयथुर्गलविद्रधिः ॥

मन्थायां गलगण्डकस्त्वचि चितो यन्मुष्कवल्लम्बते
वातात्कण्ठविशोषणोसितशिरो नद्धश्चितोऽतिव्यथः ।
कण्डूमान् कठिनः कफादुपचितः कण्ठास्यमाधुर्यकृ—
न्मेदोजः कफवद्वपुः समचयः शब्दं विधत्ते गले ॥

इत्यष्टादश रोगाः स्युः कण्ठजास्तेषु वर्जयेत् ।
रोहिण्यौ सन्निपातास्रा जलौघादीनि पञ्च च ॥

कृच्छ्रोच्छ्वासस्वरा वर्ज्याः वर्षाभूगलगण्डकम् ।
साध्यानां रोहिणीनां तु हितं शोणितमोक्षणम् ॥

छर्दनं धूमपानञ्च गण्डूषो नस्यकर्म च ।
अथान्तर्बाह्यतः स्विन्नां वातरोहिणिकां लिखेत् ॥

अङ्गुलीशस्त्रके ाशु पटुयुक्तं नखेन वा ।
पञ्चमूलाम्बु कवलं तैले गण्डूषनावनम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

विस्राव्य पित्तसम्भूतां सिताक्षौद्रप्रियङ्गुभिः ।
घर्षेत्सलोध्रपत्तुङ्गैः कवलैः कथितैश्च तैः ॥

साङ्गारधूमैः कफजां कटुकैः प्रतिसारयेत् ।
नस्यगण्डूषयोस्तैलं साधितञ्च प्रशस्यते ॥

अपामार्गफलश्वेता दन्ती जन्तुघ्नसैन्धवैः ।
तद्वच्च बृन्दशाल्वक तुण्डिकेरीगिलायुत्रा ॥५१०॥

विद्रधौ स्राविते श्रेष्ठा रोचनाताक्ष्यगैरिकैः ।
सलोध्रपटुपत्तुङ्ग कर्णौ गण्डूषघर्षणैः ॥

जिह्वायां द्वादशाधस्थाः सिरार्धदश कीर्तिताः ।
तासां स्थूलतरे कृष्णे द्वे च च्छिद्याच्छनैः शनैः ॥

बडिशेनोपसङ्गृह्य कुशपत्रेण बुद्धिमान् ।
सिते रक्तव्रणे तस्मिन् दद्यात्सगुडमाक्षिकम् ॥

कर्णयुग्मे बहिस्सन्धि मर्माभ्याशे स्थिरञ्च यत् ।
उपर्युपरि तं छिन्द्याद्गलगण्डे शिरात्रयम् ॥

मण्डूरं महिषीमूत्रं मिश्रमासंस्थितं घटे ।
पटानद्धे लिंह्य........ गल्लगण्डे समाक्षिकम् ॥

राजीवचानागरमातुलुङ्ग रसोन सिन्धूद्भवसिन्धुवारैः ।
लेपः स्नुही पत्ररसेन पिष्टैः सपूतिकाक्तैर्गलगण्डभेदी ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

हंसपाद्यमृतावासा पिप्पलीनिम्बपाचितम् ।
सलिलं गलगण्डेषु गण्डमालेषु चेष्यते ।।

गलगण्डेष्वसृङ्मोक्षस्तीक्ष्णैर्नस्यादिकर्म च ।
क्वाथः पानञ्च दार्वीत्वङ्निम्बतार्क्ष्यकलिङ्गजः ।।

हारीतकी कषायो वा पेयो माक्षिकसंयुतः ।
श्रेष्ठव्योषयवक्षार दार्वीद्वीपिरसाञ्जनैः ।।

सपाठा तेजनी निम्बे शुक्लगोमूत्रसाधितैः ।
कवलो गुलिका चात्र कल्पिता प्रतिसारणम् ।।५२०।।

कुलुत्थमुद्गनिर्गुण्डी शुण्ठी रजनिसम्भवः ।
क्वाथः कणारजोयुक्तः सक्षौद्रः कण्ठरोगहा ।।

वत्सकातिविषादारु पाठातिक्ताम्बुदाः समाः ।
गोमूत्रे............ ....रागसमाक्षिकाः ।।

तालीसपत्रं मरिचं पलाशक्षारं समुष्का यवशूकजश्च ।
सपञ्चकोलं गृहधूममेदा गुडेन कण्ठार्तिषु पीडयेत् ।।

पाकेन्तर्वदनं चलादनियतः स्थान व्रणालोहिताः
शीतालुः स्फुटता खरा च रसना ताम्रौ च दन्तच्छदौ ।
तिक्तत्वं वदने सदाहपिटका पित्तात्तथा शोणिता
पिच्छागण्डयतीन्परूंत्रि कफतः सर्वाकृतिः सर्वतः ।।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अधः प्रतिहतो वायुरर्शोगुल्मकफादिभिः ।
यात्यूर्ध्वं वक्त्रदौर्गन्ध्यं कुर्वन्नूर्ध्वगदस्तु सः ॥

अन्तः कपोलमाश्रित्य श्यावपाण्डुकफोम्बुदम् ।
कुर्यात्तद्वद् द्रुतं भिन्नं मृदितञ्च विवर्धते ॥

पूत्यास्यतास्य दौर्गन्ध्यं दन्तरोष्ठादिवर्जनात् ।
त्यजेदूर्ध्वं गदं तेषामर्बुदञ्च चिरन्तनम् ॥

मुखपाकेषु सक्षौद्राः प्रयोज्या मुखधावनाः ।
क्वथिताः त्रिफलापाठा मृद्वीका जातिपल्लवाः ॥

निष्ठीव्या भक्षितव्या वा कुठेरादिगणोऽथ वा ।
साधिता विंशतिगुणे दार्व्यास्त्वर्धतुलां पचेत् ॥

तत्क्वाथं गैरिकोपेत मादर्वीलेपनाच्छृतम् ।
सक्षौद्रं घृतभाण्डस्थं निष्ठीवेद्वदनामयी ॥५३०॥

अरिमेदत्वचो जात्या वरायाश्चाप्ययं विधिः ।
हरिबेरं हरिद्रे द्वे त्रिफलातण्डुलीयकम् ॥

एतानि मधुयुक्तानि मुखपाकस्य भेषजम् ।
जातीपत्र्यमृता द्राक्षा यष्टीदार्वीफलत्रयैः ॥

क्वाथः क्षौद्रयुतः शीतो गण्डूषो मुखशोषनुत् ।
लेहश्च मधुसंयुक्तैस्तिलमालतिपल्लवैः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सप्तच्छदोशीरपटोलमुस्ता हरीतकीतिक्तकरोहिणीभिः ।
यष्ट्याह्वराजादनचन्दनैश्च क्वाथं पिबेत्पाकहरं मुखस्य ॥

पटोलनिम्बत्रिफलाविशालं त्रायन्ति तिक्ताद्विनिशामृतानाम् ।
पीतः कषायो मधुना निहन्ति मुखे स्थितांश्चास्यगदानशेषान् ॥

मुखपाकेऽनिलात्कृष्ण पटोलं प्रतिसारणम् ।
तैलं वातहरैस्सिद्धं हितं कवलनस्ययोः ॥

पित्तास्रे रक्तपित्तघ्नः कफघ्नश्च कफे विधिः ।
लिखेच्छारत्रादिपत्रैश्च पिटकाः कठिनाः स्थिराः ॥

यथा दोषोदयं कुर्यात्सन्निपाते चिकित्सितम् ।
वमनं मुखदौर्गन्ध्ये धूमस्तीक्ष्णः सनातनः ॥

कषायतिक्तकटुकैरन्वहं दन्तधावनम् ।
तिक्ततैलेन गण्डूषश्शीतादोपकुशे च यत् ॥

लोध्रमेलावरा चव्यं पिप्पलीतण्डुलं मधु ।
मुस्तैलाकुष्ठयष्टीत्वक्पिप्पलीसुरसास्तथा ॥५४०॥

पिचुमन्दशलाकानां चुभि प्रातर्विमर्षणे ।
नवे छिद्रे त्वसम्बद्धे भेदिते प्रेतिसारणम् ॥

स्वर्चिकानागरक्षौद्रैः क्वाथो गण्डूष इष्यते ।
गुडूची निम्बवल्कोत्थो मधुतैलसमन्वितः ॥

(९)

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

गृहधूमताक्ष्यपाठा व्योषक्षारान्ययोत्ररातेजोह्वैः ।
मुखदन्तगलविकारैः सक्षौद्राकालकोविधार्यंचूर्णम् ॥

दार्वीत्वक्सिन्धूद्भव मनःशिलायावशूकहरितालैः ।
धार्यः पीतकचूर्णो गलदन्तस्यामये समध्वाज्यः ॥

जातीपत्रारिमेदत्वगमृलानागराम्बुजैः ।
क्राथोऽयं मुखरोगेषु शस्तो गण्डूषधारणे ॥

त्रिफलाखदिरार्जुनलोहमलैः सकरञ्जशिफैः सह मागधिकैः ।
घृततैलयुतं सलिलं क्वथितं वदने निहितं वदनामयजित् ॥

गोमूत्रकथनविलीनविग्रहाणां
पथ्यानां जलमिशिकुष्ठभाविताानाम् ।
अत्तारं नरमृणवोऽपिवक्त्ररोगा
स्स्रोतारं नृपमिव न स्पृशन्त्यनर्थाः ॥

रजनीतुङ्गरसाभ्यां दशपाकशृतं हव्यघृतम् ।
सा.... मुखरोगान् कुवलयपत्त्रं यथा जग्धम् ॥

मरीच्यौषधनिर्गुण्डी चित्रकान् काञ्जिके पचेत् ।
हिङ्गुत्रिजातत्रिकटुत्रिफलादारुसैन्धवैः ॥

विलङ्गसर्षपवचा यावशूकनिशाद्वयैः ।
जीरकद्वयकर्पूरयवान्यैः सह चूर्णितैः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

।

तेन गण्डूषणं सर्वमुखरोगप्रणाशनम् ॥

मुखदन्तमूलगलजाः प्रायो रोगाः कफास्रभूयिष्ठाः ।
तस्मात्तेषामसृग्दुष्टं विस्रावयेदस्रम् ॥

कायशिरसोर्विरेको वमनं कवलग्रहाश्च कटुतिक्ताः ।
प्रायः ....षां कफरक्तहरं तथाक्रमः ॥

यवतृण धान्य....भक्तं द्विदलैः क्षारोषितैरपस्नेहाः ।
यूषा भक्ष्याश्च हिता यच्चान्यच्छ्लेष्मनाशाय ॥

वाङ्निरोधस्य करणान्मुखरोगोऽत्र काचनम् ।
मुक्तापुच्छं रौप्यदन्तं किरणं रत्ने........चनम् ॥

अग्निर्नाग्निस्तथाप्याय शुक्रान्त इति च क्रमात् ।
अश्वत्थाज्यतिलैर्होमं कृते दद्याच्च मन्त्रवित् ॥

सुप्रतीकगजेन्द्रस्त्वं सरस्वत्याभिषेचकः ।
इन्द्रस्य वाहनं शश्वत्सर्वदेवैश्च पूजितः ॥

दानेनानेन दत्तेन मुखरोगं विनाशय ।
स्याच्च कृच्छ्रादिसावित्री जपकूष्माण्डहोमकृत् ॥५५०॥

ओष्ठे गण्डे द्विजे मूले जिह्वायां तालुके गले ।
मुखे सर्वत्र चेत्युक्ताः पञ्चसप्ततिरामयाः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

निस्तुद्येतेथशङ्खौ भ्रुवमधिकमलः पातयन्त्येव नेत्रे
निष्कृष्येतेनिलोत्थे प्रचलति च शिरा जालमु....क्तसन्धि ।
मूर्धास्थ्यौ घूर्णतीवे व्यथनमुपशिरो निर्णिमित्तं च कर्णौ
बाध्ये....स्नेहवद्भिः शमनमसहनं जायते मूर्धतापे ॥

शिरोभितापे पित्तोत्थे शिरोध्वंसमतिज्वरः ।
स्वेदोक्षिदहनं मूर्च्छा निशि शीतैश्च मार्दवम् ॥

कफोद्भवे मूर्ध........त्वशैत्यमालस्यनिष्पन्दशिलात्वचन्द्राः ।
शुनाक्षतीरात्रिषु रुक्प्रभूता प्रच्छर्दनं कर्णगता च कण्डूः ॥

प्रक्लिन्ने रुधिरामये प्रकुपितैर्दोषैर्विमिश्राशना–
त्सञ्जाताः क्रिमयोत्यघांसमा....कां कुर्वन्पिबन्तोऽसृजम् ।
चित्तौ....क्षयरौक्ष्यशोफदहनं ताम्राश्व सिङ्घाणकं
गण्डूतिश्वयथुं कपालशिरसो तापः स जन्तूद्भवः ॥

रक्तात्पित्ताधिकरुजः सर्वैः स्यात्सर्वलक्षणः ।
वातोल्बणः शिरः कम्पं तत्संज्ञं कुर्वते मलाः ॥

मूर्धस्तापोर्द्धवायु....थाव भेदः पित्तश्लेष्मास्त्रैरन्वितः केवलो वा ।
पक्षान्मासाद्यः प्रकुप्यत्यकाण्डे शाम्येद्बाधिर्यं तत्य ...प्यान्ध्यतां वा ॥

वातात्पित्तयुताल्ललाटनयन भ्रूशङ्ख....महा
नामध्यान्तमुपैति वृद्धिमनिशं चारभ्य सूर्योदयात् ।
शीतोष्णैरनवस्थितोपशमनः प्रायस्स्वयं शंसनः
सूर्यावर्त इतीरितो व्ययधिकक्लेशावहः क्षुद्रतः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सरक्तपित्तोत्तरसन्निपाता तिक्तास्यता पीतमुखश्च युक्तः ।
गदाहरीगाज्वरतृड् च शोफ शङ्काश्रयं शङ्ककरं विवर्ज्यः ॥

शिरोभितापेऽनिलजे वातव्याधिविधिं चरेत् ।
पिण्डोपदाहस्वेदाश्च मांसधान्याकृता हिताः ॥५६०॥

वातघ्नदशमूलादि सिद्धक्षीरेण सेचनम् ।
सिद्धं नस्यं तथा धूमः शिरः स्रवणतर्पणः ॥

कदुष्णैर्बस्तशक्तपिण्डैः स्वेदो महुर्हितः ।
ललाटे घृतमण्डाक्ते सर्वशीर्षरुजापहः ॥

करणादिगणे क्षुण्णे क्षीरमर्धोदकं पचेत् ।
क्षीरावशिष्टं तच्छीतं मथित्वा सारमाहरेत् ॥

ततो मधुकरैः सिद्धं नस्यं तत्पूजितं हविः ।
वर्गेऽत्र पक्वं क्षीरे च पेयं सर्पिः सशर्करम् ॥

कार्पासमज्जात्वङ्मूलं सुमनः क्षारकाणि च ।
नस्यमुष्णाम्बुपिष्टानि सर्वमूर्धरुजापहम् ॥

शर्कराकुङ्कुमशृतं घृतं पित्तासृगामये ।
प्रलेपः सघृतैः कुष्ठ ....द्नैः ॥

व्यतोद्दर्त (भ) याद्र (द्रा) न ....वासिन्नावसेचयेत् ।
उत्पश्यन्तौ चले दाहः कफे चोष्ठो यथोदितः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पिप्पल्या मूर्ध्नि तालौ च शङ्खान्ते मन्ययोरपि ।
शिरोभितापे पित्तोत्थे स्निग्धस्य व्यथयेच्छिराम् ॥

शीताः शिरोमुखालेप सेकशोधनवस्तयः ।
जीवनीयशृते क्षीरे सर्पिषीपाननस्ययोः ॥

शारिबाकुष्ठलामज्जनिम्बनिर्यासवासकैः ।
अथवा चन्दनोशीर यष्ट्युत्पलबलानखैः ॥५७०॥

गोक्षीरपिष्टैः सघृतैर्लेपः पित्तशिरोर्तिजित् ।
श्लेष्माभितापे जीर्णाच्च स्नेहितः कटुकैर्वमेत् ॥

स्वेदप्रलेपनस्याद्या रूक्षातिक्तोष्णभेषजैः ।
क्रिमिजे शोणितं नस्ये तेन मूर्च्छन्ति जन्तवः ॥

मत्ताः शोणितगन्धेन निर्यान्ति घ्राणवक्त्रयोः ।
तीक्ष्णाभ्यां धूमनस्याभ्यां कुर्यान्निर्हरणं ततः ॥

क्रिमिभिः पीतरक्तत्वाद्रक्तमत्र न निर्हरेत् ।
विलङ्गं स्वर्चिकादन्ती हिङ्गुगोमूत्रसाधितम् ॥

कटुनिम्बेङ्गुदीपीलुतैलं नस्यं पृथक् पृथक् ।
अजामूत्रयुतं नस्यं क्रिमिजित्क्रिमिजित्परम् ॥

पूतिमत्स्ययुतैः कुर्याद्धूमनावनभेषजैः ।
रक्तजे पित्तवत्कर्म निचये मिश्रमाचरेत् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वाताभितापे विहितः कम्पे दाहाद्विना क्रमः ।
सेचनं तैलघृतयोस्ताभ्यां नस्यं विरेचनम् ॥

जाङ्गलैरुपनाहश्च सूर्यावर्तार्धभेदयोः ।
वाताभितापजिच्चेष्ट स्सूर्यावर्तशिराव्यथः ॥

सिद्धं दुग्धे शर्करायष्टिकाभ्यां सूर्यावर्तेऽर्धावभेदे च सर्पिः ।
नस्यं कुर्याच्छर्कराकुङ्कुमाभ्यां सिद्धं सर्पिर्नावनं वा तथैव ॥

शङ्खके तु क्रियां कुर्यात्प्रत्याख्याय विसर्पवत् ।
पित्तमूर्धाभितापोक्ता सविलेपं विशेषतः ॥५८०॥

दूर्वाकृष्णतिला भीरु नील्गेत्पलपुनर्नवैः ।
क्रौञ्चकादम्बहंसानां शरायावच्छपस्य वा ॥

रसेन बृंहितस्याथ तस्य शङ्खस्य सन्ति या ।
ऊर्ध्वं तिस्रः शिराः प्राज्ञो भिन्द्यादेव नताद्वयेत् ॥

शिरोरोगेषु कार्पास पीलुखर्जूरपल्लवान् ।
पक्त्वा वा स्वस्तिकं शाकं पयसा स्वेदमाचरेत् ॥

ललाटे घृतमन्दाक्ते पायसे वा ससैन्धवः ।
ससैन्धवो वा कृसरस्वेदः कोष्णः शिरोर्तिजित् ॥

नस्यं विदध्याद्गुडनागरं वा समाणिमन्थं मगधोद्भवं वा ।
घ्राणास्यमन्यो हनुबाहुपृष्ठ शिरोक्षिदन्तश्रवणामयेषु ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

विश्वोषणनि ग्राचूर्णबिडास्तैलेक्षिताः पृथक् ।
धूम्रनस्याः शिरोरोगं शमयन्ति यथाक्रमम् ॥

स्तन्ये निर्घृष्टा शुण्ठी लेपादचिराच्छिरोर्तिमपहरति ।
पुन्नागबीजमज्जा पिष्ट इवा....व्राजति सोमेन ॥

शुण्ठीविलङ्गयष्ट्याह्वैर्भृङ्गतोये शृतं घृतम् ।
नस्यं षड्बिन्दुदानेन सर्वमूर्धगदापहम् ॥

मञ्जिष्ठाञ्जनशारिबाब्दकटको तक्कोलजातीफल–
श्रीखण्डत्रिफलाजटातगररुग्यष्टीचतुर्जातकैः ।
सोशीरागरुचोचयुग्ममृगनाभीन्दूत्पलाम्भोबिसैः
तैलं नेत्रशिरोर्तिहारि सपयःसिद्धं कुमारीरसे ॥

काथो धात्रीगुडूच्योर्बिसमधुकबला शारिबोशीरपद्मैः
काकोल्यादित्रिजातागरुसरलमधूकोत्पलाम्भोत्ररीभिः ।
पेष्टा तक्कोलजातीतगरमृगमदैश्चन्दनाब्देन्दुचोरै–
स्तैलं पक्वं सदुग्धं शमयति निरतं रोगजातं शिरोक्ष्णोः ॥५९०॥

तैलं हन्ति सदुग्धमक्षिशिरसो रोगान्गुडूची बला–
काथे साधितमब्दचोरकशटी तक्कोलजातीहिमैः ।
काकोल्यादिमधूकदारुसरल श्रेष्ठा चतुर्जातकै–
र्यष्टी सेव्यविषोत्पलागरुवरी कर्पूरकुष्ठाम्बुभिः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अरुणरिपुगुडूचीकेतकीनिम्बधात्री
तरुणजलकुमारीकूलकस्वस्तिकानाम् ।
सलिलमपि च कुष्ठस्यापि तैलं पयश्चे-
त्यखिलमिह समानं भागतो लोहपक्वम् ॥

अगरुबिसगुडूचीजातितक्कोलबीजै-
र्मधुरनयनभूषाशारिबावारिशीतैः ।
त्रिसुरभिशशिकुष्ठोशीरसुतोत्पलाब्जै-
र्निशितगरविदारीजोनमाक्षीकतुल्यैः ॥

एतत्तैलं शीतपिण्डाभिधानं चक्षुर्मूर्धादाहपाकानि हन्यात् ।
स्यात्तस्फोटैर्लक्षितामूर्धजाना मक्ष्णोश्चापि स्रावतैमिर्यकाचान् ॥

तुङ्गद्रुमस्य तरुणस्य जले सुगन्धा
लामज्जयष्टिमधुकोत्पलचन्दनानाम् ।
कल्केन दुग्धसहितेन विपक्वमेत-
त्तैलं शिरोनयनतर्पणतर्पणेन ॥

चन्दनं वकुलात्पुष्टं मधूकञ्च समन्ततः ।
द्विगुणं शारिबाजीरं वालकं द्विगुणं ततः ॥

गुडूची द्विगुणात्तस्माद्धलाधात्रीफलं ततः ।
द्विगुणः स्याज्जलद्रोणे तैः पचेत्पादशेषिते ॥

(१०)

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शतावरीकुमारीक्षुनारिकेलजलैः समे ।
तस्मिंश्चतुर्गुणक्षीरे लाक्षालोध्रकशेरुकैः ॥

प्रपुण्डरीकमञ्जिष्ठपद्मकेसरपद्मकैः ।
मधूकमदनद्राक्षा कुष्ठेलाततचोरकैः ॥

अनन्ता कुशकाशाश्वगन्धाश्यामाशिलोद्भवैः ।
कर्पूरदर्पपूत्यण्डमुस्तातक्कोलतण्डुलैः ॥६००॥

रास्नातामलकीतिक्ता शताह्वाक्षीरिपल्लवैः ।
गणेन जीवनीयेन त्रिफलाजातिपल्लवैः ॥

कुमुदोत्पलकल्हार पद्मकन्दैश्च साधितम् ।
तैलप्रस्थं निहन्त्याशु पानाभ्यञ्जननावनैः ॥

शिरोनेत्राङ्गदाहान्तर्दाहतृष्णाक्षतक्षयात् ।
आढ्यवातपरीसर्पकामिलासृग्दरज्वरान् ॥

पित्तासृक्चित्तविभ्रंशमूर्च्छामोहमदहभ्रमान् ।
अन्यांश्चानिलपित्तघ्नानाढ्यवातं विशेषतः ॥

अस्याभ्यङ्गान्महानीलकुञ्चिताग्रा मनोहराः ।
अभङ्गुराः सुरभयो मृदुस्निग्धाश्च कुन्तलाः ॥

कपाले पवने दुष्टे गर्भस्थापि जायते ।
सवर्णो नीरुजः शोफस्तं विद्यादुपशीर्षकम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

यथा दोषोदयं ब्रूयात्पिटकार्बुदविद्रधीः ।
पित्तासृक्कफजाः क्लिन्नाः पिटकाः स्युररूंषिकाः ॥

कण्डूतिकेशच्युतिवत्सूक्ष्मासूक्ष्मरजः किरः ।
वृष्यमाणोऽनिलकफस्फोटादारणकत्वचः ॥

पित्तव्यानाभ्यां रोमकूपानगाभ्यां रोमणां प्रत्यां....गोद्गमे चापरेषाम् ।
रक्तश्लेष्मभ्यां रोमकूपापरोधाद्रक्ष्या विज्ञातव्येन्द्रलुप्तामयाश्च ॥

इन्द्रगुप्तवदुपस्थितामलाः शातयन्ति यदि मूर्धजान् क्रमात् ।
सा भवेत्खलतिरग्निदग्धवत्प्रोत्सरा त्वचि घनाचिताखिलैः ॥६१०॥

वैद्याः पञ्चबलां वदन्ति पलितां शोकादितप्तस्य—
केशानां पचनं शिरः प्रसरता दुष्टेन देहोष्मणा ।
तत्तद्वर्णयुतं मलैरखिलज न्त्यामिश्रधक्ष्मेतर—
मूर्धातिप्रभवं पुनर्न सहते स्पर्शं त्रिवर्णं तथा ॥

स्वधतिरखिलजाग्निनैवदग्धा स्फुटदवद्युनसरग्निनष्टरोग्ना ।
पलितमपि समस्तजं न सिद्ध्येत्परिणतिरसायनं व्यपोह्या ॥

नत्रे जन्मोत्तरं जाते योजयेदुपशीर्षके ।
वातव्याधिक्रियां पक्के कर्म विद्रधिचोदितम् ॥

सामपक्के यथा योग्यं विद्रधिः पिटकार्बुदे ।
अरूंषिकां जलूकाभिर्हतास्रां निम्बवारिणा ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पटोलनिम्बपत्रैर्वा सहरिद्रैः सकल्कितैः ।
कपालभृष्टं पिष्टं वा चूर्णितं तैलसंयुतम् ॥

रूक्षिकालेपनं कण्डूक्लेददाहार्तिनाशनम् ।
अशान्तौ शिरसः शुद्धौ यतेत वमनादिभिः ॥

विध्येच्छिरां दारणके ललाट्यां शीलयन्महान् ।
नावनं मूर्धवस्तिश्च लेपयेच्च समाक्षिकैः ॥

प्रियालबीजमधुक कुष्ठमाषैः ससर्षपैः ।
कोरदूष्यत्वक्षारवारिप्रक्षालनं हितम् ॥

।

धुत्तूररसतद्बीजसिद्धं तैलञ्च लेपने ॥

लेपान्मुस्तात्कारभीतीक्ष्णनिम्ब त्वग्धात्र्यङ्कोलास्थिरुग्भागबद्धम् ।
एकैकं वा लैकुचाम्भः प्रपिष्टं तत्सिद्धं वा तैलमुर्वासहारि ॥६२०॥

अङ्कोलबीजमरिचामयजः परागो
यः कुण्डलीफलरसेन मुहुर्निषिक्तः ।
तैलान्वितोऽनुनिदिनं निहितः स धान्ये
कण्डूकचस्फुटनदारणकप्रणुत्स्यात् ॥

सन्धिगश्चान्तकस्थं दृग्दाहश्चित्तविभ्रमः ।
शीताङ्गस्तान्द्रिकः प्रोक्तः कण्ठकुब्जश्चकर्णिकः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

विख्यातो भग्ननेत्रश्च रक्तष्ठीवी प्रलापकः ।
जिह्वकश्चेत्यभिन्यासस्सन्निपातास्त्रयोदश ॥

पूर्वरूपकृतशूलसम्भवं शोफवातबहुवेदनान्वितम् ।
श्लेष्मतापबलहानिजागरं सन्निपातमिति सन्धिकं वदेत् ॥

दाहं तनोति परितापनमातनोति मोहं ददाति रुदतेतिशिरः प्रकम्पः ।
हिक्कां धिनोति श्वसनञ्च समातनोति जानीहि तं विबुध कृच्छ्रमथान्तकस्थम् ॥

प्रलापपरितापनप्रबलमोहतापक्लमः
परिभ्रमणवेदनाव्यथितकण्ठमन्याहनुः ।
निरन्तरतृषाकरः श्वसनशूलहिक्काकुलः
सकष्टतरसाधनो भवति हन्ति रुग्दाहकः ॥

यदि कथमपि पुंसां जायते कायपीडा
भ्रममदपरितापा मोहवैकल्यहासाः ।
विकटनयनभावो गीतनृत्तप्रलापाः
विदधति च सुसाध्यं केऽपि चित्तभ्रमाख्यम् ॥

हिमसदृशशरीरो वेपथुः श्वासहिक्का
शिथिलितसकलाङ्गः खिन्ननादः प्रलापः ।
क्लमयुतबहुकासच्छर्दतीसारयुक्त–
स्त्वरितमरणयुक्तः शीतगात्रः प्रभावात् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

प्रभूता तन्द्रार्तिर्ज्वरकफपिपासाकुलतरो
भवेच्छ्यामा जिह्वा पृथुलकठिना कण्टकवृता ।
अतीसारश्वासक्लमसुपरितापस्मृतिहरो
रुजाकण्ठो कण्डू बहिरपि च निद्रा प्रलपति ।।

(भृशं कण्ठे जाड्यं शयनमनिशं तान्द्रिकगदे) ।।

शिरोर्तिकण्ठग्रहणं सदाह
कम्पज्वरोपस्थ (रारक्त) समीरणार्तिः ।
हनुग्रहोत्ता (हस्ता) पविलापमूर्च्छा
स्यात्कण्ठकूजः (कुब्जः) किल कष्टसाध्यः ।।

प्रलापस्मृति भ्रंशकण्ठग्रहाङ्ग व्यथाश्वासकम्पप्रसेकप्रसूतम् ।
ज्वरस्तापकर्णान्तिगण्डप्रकोपं बुधाकर्णकं कष्टसाध्यं वदन्ति ।।

स्वरयुतः करणस्मृतिशून्यता श्वसनभुग्नविलोचनमोहिता ।
प्रलपनभ्रमकम्पनशोकवांस्त्यजतिजीवितमाशु सभुग्नदृक् ।।

रक्तष्ठीवी ज्वरमितृषामोहशूलातिसारा
हिक्काध्मानभ्रमणदवथुश्वाससंज्ञाप्रणाशः ।
श्यामारक्ताधिकतरतनुर्मण्डनोत्थानरूपो
रक्तष्ठीवी निगदति द्रुतप्राणहन्ता प्रसिद्धः ।।

कम्पप्रलापपरितापविबद्धपीडा त्रासप्रतापमवमानपरो विचित्रः ।
प्रज्ञाप्रणाशविकलः प्रचुरप्रवादः क्षिप्रं प्रयाति पितृराजपदं प्रलापी ।।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

श्वसनकासपरितापविह्वलः कठिनकण्टकतापनिवृत्तिजिह्वः ।
बधिरमूकबलहानिलक्षणो भवति कष्टतर एष जिह्वकः ॥

दोषत्रयस्निग्धमुखत्वनिद्रा वैकल्यनिश्चेष्टननष्टवाक्त्वम् ।
बलप्रणाशश्वसनादिविग्रड्ग्रहोऽभिन्यासनामा स तु मृत्युकल्पः ॥

सन्धिस्थे हितमाशुलङ्घनवमिस्वेदोपदाहादिकं
रूक्षं कर्म समस्तमेव विहितं कुर्याद्यवागूक्रमम् ।
मूलीपञ्चककल्पितमिदं सन्मागधीमिश्रितं
कौलुत्थेन रसेन सैन्धवयुतं देयं च विश्वौषधम् ॥

रास्नागुडूचीशटिवृद्धदारु सुराह्वविश्वत्रिफलावलीभिः ।
क्वाथं पिबेद्गुग्गुलुसंप्रयुक्तं समस्तसन्धिग्रहसन्निपाते ॥

अमृतोरुबूकविश्वा सुरतरुरास्नाहरीतकीक्वाथः ।
सकलसमीरणरोगान् प्रातः सद्योहरेत्पीतः ॥

ग्रन्थिककलितरुपथ्या कृतमूलशिवाटरूषकैर्निहितः ।
एरण्डतैलसहितः क्वाथो हन्यान्मरुद्रोगम् ॥

रास्नाशुण्ठीगुडूचीसहचरजलदापीलुयष्टीसुराह्वैः
शुल्लाकर्पूरवाशानिलरिपुसहितैः पञ्चमूलीद्वयेन ।
एभिर्द्रव्यैः कषायस्त्वरितमपहरेत्पीतमात्रप्रभावा
मन्यस्तम्भान्त्रवृद्धिज्वरपिटककटीसन्धिसर्वाङ्गपीडाम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

निर्गुण्डीपूरसहितः सिद्धार्थकनिम्बपत्रसंयुक्तः ।
सर्जरसेन समेतो धूपः सन्धिग्रहं हन्ति ॥

(अन्तकस्थः असाध्यः)

जलधरमलयजनागर पर्पटकोशीरवालकक्वथितम् ।
यः पिबति पयः शीतं प्रयाति दृग्दाहकस्तस्य ॥

बदरीपल्लवलेपः श्रीखण्डविष्टपेन संयुक्तः ।
दातव्यः पादतले दृग्दाहकसान्निपातघ्नः ॥

अगरुघनशीरसिक्थककररुहमतभीरुचन्दनैर्विहितः ।
दृग्दाहसन्निपातं निहन्तिमधुमिश्रितो धूपः ॥

अभया पटोलमुस्ताकटुकौशम्याकगोस्तनीक्वाथः ।
पीतः करोति शन्ति दृग्दाहकसन्निपातस्य ॥

ब्राह्मी द्राक्षा जलधरवराभीरुशम्याकतिक्ता
पथ्या धात्रीकलितरुबलाबिम्बकोशातकीभिः ।
भूनिम्बाद्यो भवति सहितः पञ्चमूलद्वयेन
पीतः क्वाथः सकलपवनव्याधिदृग्दाहहन्ता ॥

पथ्या पर्पटकृष्णा मृद्वीकाजलदभूनिम्बाः ।
शम्याकपटोलनिम्ब शिवाक्वाथोऽयं चित्तविभ्रमं हन्ति ॥

हरीतकी पर्पटराजवृक्ष शम्याकपृश्नी कटुकापयोभिः ।
शम्याकमेदाद्वयपर्णिनीभिश्चित्तभ्रमं हन्ति कषाय एषः ॥

(शीताङ्गः असाध्यः)

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

भार्गीपुष्करपथ्या निदिग्धिकानागरामृताक्काथः ।
अपनयति तान्त्रिकगदं निस्सन्देहं प्रगे पीतः ॥६५०॥

कुष्ठगवाक्षीनागर द्विनिशामरिचं कणावचायुक्तम् ।
बस्तसलिलेन पिष्टं नस्यं हन्यात्तान्द्रिकं रोगम् ॥

नयनाञ्जने रसोनं दिनकृत्करवीरपत्ररसैः ।
कृष्णामनःशिलैला रञ्जनमप्यत्र तान्द्रिके शस्तम् ॥

अमृतापटोलपयोव्योषयुतं तान्द्रिकं हन्ति कण्ठकूजस्य ।
त्रिकटुककलिङ्गकटुका हरीतकीघनविभीतकामलकैः ॥

ध्वंसयति कण्ठकूजं द्विभरजनीद्वययुतः क्वाथ ।
॥

शृङ्गीवृष्टुकरेचकीघनशटीभूनिम्बभार्गीनिशा
तिक्तापुष्करचित्रकैश्च चविकाशुण्ठीकणाकट्फलैः ।
धात्रीदारुविभीतकैः समरिचैर्व्याघ्रीवृषोन्मिश्रितै
रेतैः कृन्तति कण्ठकूजमचिरात्कोष्णः कषायः कृतः ॥

अपनयति कण्ठकूजं कृष्णापामार्गबीजयुक्तं च ।
सिन्धूत्थं गोजलयुतत्रिकटुककटुतुम्बिनीनस्यम् ॥

रक्तस्रावो जलूकाभिर्घृतपानश्च युज्यते ।
कर्णकग्रन्थिनाशाय जीवशास्त्रविशारदैः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

रास्ना बृहती पथ्या घनकटुकान्योषपुष्कराह्ववचाः ।
शृङ्गीपाठाभार्गीक्वाथः स्यात्कर्णकहरः पानात् ॥

मरिचदशमूलकटुका मरिचवरा विश्वमागधीमिश्रः ।
भूनिम्बयुतः पीतः कर्णकहन्ता भवेत्क्वाथः ॥

हिङ्गुद्विनिशविशाला सैन्धवसुरदारुकुष्ठविलङ्गैः ।
दत्तः क्रमेण लेपः कर्णकहन्ता भवेद्योगः ॥६६०॥

दशशतकरदुग्धापुष्कराह्वैः समेतं
दहनकुटनिकुम्भं कुष्ठकासीसयुक्तम् ।
अपनयति वितीर्णं लेपनं सप्तरात्रा–
च्छ्वयथुदरणयुक्तं कर्णकग्रन्थिमेतत् ॥

अशिशिरजलपिष्टं नाशनं कर्णकानां
जनयति मुखशुद्धिं घ्राणरन्ध्रप्रवेशात् ।
लवणपरमकृष्णाचूर्णयुक्तं प्रभाते
सकलमुनिभिरुक्तं व्याधिविध्वंसकारि ॥

(भग्ननेत्रस्य)

दार्व्यम्बुदातिक्तफलत्रयश्च क्षुद्रापटोलीरजनी सनिम्बम् ।
क्वाथं विदध्याज्ज्वरसन्निपाते निश्चेतने पुंसि विबोधनाय ॥

श्रेष्ठा पटोलकटुका घननिम्बसुराह्वधान्यकैः क्वाथः ।
हन्ति भृशमा....पित्तज्वरमुग्रं सन्निपातोत्थम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

भूनिम्बमाक्षिककणासहितश्च कुर्या-

छेहं कणोषणरसेन सुराजिकाभिः ।

नेत्राञ्जनञ्च लवणोत्तमपिप्पलीभ्यां

नस्यं वचामरिचहिङ्गुमधूकसारैः ॥

मरिचतुरगगन्धामागधीसिन्धुजाती

लशुनमधुकसारं चोग्रगन्धाहकाभ्याम् ।

छगलजलसुपिष्टं संयुतं शास्त्रविद्भि-

स्सपदि भवति नस्यं भुग्ननेत्रप्रणाशी ॥

(रक्तष्ठीवस्य)

पर्पटधन्वयवोसकवासा भूस्तृणकैः कटुकाफलिनीभ्याम् ।

शर्करया सहितस्तु कषायो लोहितमास्यगतं खलु हन्ति ॥

जलदाहपद्मकवरी मलयोद्भवजातिपर्पटकमधूकैः ।

मधुनिम्बजलारुणहिमैः कथितं मुखरक्तहरं सलिलम् ॥

(प्रलापकस्य)

तगरतुरगगन्धापर्पटं शङ्खशुण्ठी

त्रिदशविटपितिक्ता मागधी भूतकेशी ।

जलधरकृतमाला केतकीगोस्तनीभ्या-

मपहरति कषायः पीतमात्रः प्रलापम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

जलधरदशमूलावारि शुण्ठी समेतं मलयरुहमुशीरं पर्पटं वाशकञ्च ।
समचरणयुतानां क्वाथशेषश्च कार्यं व्यपनयति निरंशं पीतमात्रः प्रलापम् ॥

(जिह्वकस्य)

सिंहीनागरपुष्करैः सकटुकै रास्लागुडूचीयुतै—
भार्गीकर्कटशृङ्गिकाशटिसहैर्दुःस्पर्शवासाघनैः ।
पीतं जिह्वकहारि वारि भवति ब्राह्मीवचामिश्रितै
र्युक्तं वार्यपरञ्च वन्यमुनिभिर्भूनिम्बमिश्रं शृतम् ॥

सुरतरुकटुनिम्बैः प्लक्षपथ्यापटोली
रजनियुगलत्रिश्वासिंहिकापुष्कराह्वैः ।
सलिलधरगुडूचीसंयुतः सार्धमंभिः
प्रशमयति कषायो जिह्व ं कष्टसाध्यम् ॥

तीक्ष्णद्रव्यैः सलवणैं र्मातुलुङ्गरसप्लुतः ।
जिह्वायां शुद्धिकृल्लेपः कटुतिक्तेन संयुतः ॥

(अभिन्यासस्य)

रामठनागरसहितं भृङ्गरसं लेढि यः पुमान् प्रातः ।
अथ कटुतिक्तयुतं भवति मुखे शोधनं तस्य ॥

वाशापुष्पलताक्वाथस्सैन्धवो लवणसंयुतः ।
अभिन्यासज्वरश्वासकामिलान्तकरं परम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पिष्टान्यपामार्गफलानि नस्यं गोवारिणा बुद्धिविबोधनाय ।

....॥

मरिचलवणकृष्णा भूतकेशी मधूकैः

समममनु........मृदित्वाकोष्णनीरेण नस्यम् ।

....

....॥

त्रिकटुत्रिफलारास्ना पाठाशक्रयवामृताः ।

भूनिम्बाम्बुदनिम्बाम्बु सन्निपातहरं परम् ॥

बस्ताम्बुना सिन्धुकणोवणोग्राशिलाशिरीषास्थिरसोनकल्कम् ।

पादौ ललाटञ्च विबोधनाय दहेदभिन्यासिनमञ्जयेद्वा ॥

कट्फलं पौष्करं शृङ्गी व्योषयावककारवीः ।

श्लक्ष्णचूर्णीकृतं नस्यं मधुना सह लेहयेत् ॥६८०॥

एत्रावलेहिका हन्ति सन्निपातं सुदारुणम् ।

हिक्कां श्वासं भ्रमं कासं मोहं मन्दाग्निनामपि ॥

मोहं तिक्ताकणाशृङ्गी विषाक्षौद्रावलेहिकाः ।

क्षणभङ्गमिव क्षिप्रं प्रत्यभिज्ञा व्यपोहति ॥

इन्द्रलुप्ते यथा स्विन्नां शिरां विद्ध्वा प्रलेपयेत् ।

....यगाढं कासीसमनोह्वा तुत्थकोवणैः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वन्यामरतरुभ्यां वा गुञ्जामूलफलैस्तथा ।
तथा लाङ्गलिकामूलैः करवीररसेन वा ।।

धुत्तूरकस्य पत्त्राणां भल्लातकरसेन वा ।
मालतीचित्रकाश्वत्थ नक्तमालैः प्रसाधितम् ।।

वाताख्वंषिकयोस्तैल मभ्यङ्गः क्षारमृष्टयोः ।
शुक्लरोमोद्गमे लिम्पेन्मर्षीं मेषविषाणजाम् ।।

वर्जयेद्वारिणा सेकं यावद्रोमसमुद्भवः ।
खलतौ पलिते वल्ल्यां हरिलोम्नि च शोधितम् ।।

नस्यवक्त्रशिरोभ्यङ्ग प्रलेपैः समुपाचरेत् ।
शिखिपित्तं बिसाम्रास्थिमदयन्त्यञ्जनोत्पलैः ।।

सनीलीभृङ्गकासीसैरक्षतैलं समैः पचेत् ।
लोहभाण्डस्थितं मासमकालपलितं जयेत् ।।

एतदभ्यङ्गमात्रेण नावनेन च कालजम् ।
अमृतामलकं नीली तुलसीस्वस्तिकोहटैः ।।६९०।।

इन्द्रवल्लीबलैरण्ड पलाशाः काकमाचिकाः ।
कैतकीमार्कवश्चैषां रसे सप्तगुणे पृथक् ।।

त्रिफलासनसारार्थमहिषीक्षीरषड्गुणे ।
प्रपुण्डरीकमञ्जिष्ठा शारिबाकुष्ठचन्दनैः ।।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पुष्पैः सहचरश्यामा जम्बूपिण्डीतकासमान् ।
मूलैः शतावरीदूर्वा पद्मिनी सेव्यवालकान् ॥

काष्मर्यकुसुमाम्रास्थि कासीसार्जुनवल्कलैः ।
मदिरामधुकाम्भोदशतपुष्पा सुरद्रुमैः ॥

वाकुचीलोध्रनीलाब्ज नलदागरुकर्दमैः ।
मूलेनादित्यवल्लीनां क्वाथैः कृष्णोरणस्य च ॥

तैलं तिलानां कृष्णानामाज्यं वा लोहभाजने ।
मधुपाकेन पक्वं यत्तन्मासं धान्यमध्यगम् ॥

लोहबीजकभाण्डस्थं शीतगन्धादिवासितम् ।
महानीलमिति ख्यातं नस्यमिन्द्रियवर्धनम् ॥

शाल्यन्नं मापयूषेण क्षीरेणाज्येन वाश्नतः ।
तिलान्नं वापि नस्यादि खलतिं पलितं जयेत् ॥

एभिरेव च भैषज्यैः शिरोवक्त्रञ्च लेपयेत् ।
वटावरोहकेशिन्योश्चूर्णेनादित्यपाचितम् ॥

गुडूचीस्वरसंतैलमभ्यङ्गात्केशरोहणम् ।
॥७००॥

नीलीभृङ्गजपाशतक्रतुलताधात्रीफलानां रसे
क्षीरैराविकनारिकेलमहिषीसेद्धद्रवैः साधितम् ।
तैलं तत्पयसैवपिष्टललितैर्यष्ट्याह्वगुञ्जाञ्जनैः
केशान् सञ्जनयेत्तलेऽपिकरयोरास्तामकेशंशिरः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

बीजैः श्लेष्मातकस्य व्यपगमिततुषैः काञ्जिकश्लक्ष्णपिष्टैः
यल्लिप्ता लोहदण्डाद्दिनकरकिरणैस्तापितात्प्रच्यवेत ।
तत्तैलं केशकार्ष्ण्यं जनयति परमं नावनाभ्यञ्जनाभ्यां
मूर्धाघ्राणाक्षिदन्तश्रवणगलरुजं हन्ति निःशेषतश्च ॥

भृङ्गामलकरसस्य प्रस्थे क्षीराढके पले यष्ट्याः ।
तैलप्रस्थं विपचेत्तेन बलाकापि कोकिला भवति ॥

नीलीदलं भृङ्गरसोर्जुनत्वक्पिण्डीतकं कृष्णमयोरजश्च ।
बीजोद्भवं सा (ह) चरस्य पुष्पं पथ्याक्षधात्रीसहितं विचूर्णम् ॥

एकीकृतं सर्वमिदं प्रमाय पङ्केन तुल्यं नलिनीभवेन ।
संयोक्ष्य पक्षं कलशे निधाय लोहे दृढे पद्मानि सावधाने ॥

अनेन तैलं द्विपचेद्विमिश्र्य रसेन भृङ्गत्रिफलाभवेन ।
आसन्नपाके च परीक्षणार्थं पक्षं बलाकाभवमाक्षिपेच्च ॥

भवेद्यदा तद्भ्रमराङ्गनीलं तदाविपक्वं विनिधाय पात्रे ।
कृष्णायसे मासमवस्थितं तदभ्यङ्गयोगात्पलितं निहन्यात् ॥

केतकवटमृगधात्री भृङ्गामृतानारिकेलवल्कलजे ।
धात्रीकल्केन रसे तैलं केश्यं समक्षीरम् ॥

तिलाः सामलकाः पद्मकिञ्जल्कोमधुकं मधु ।
रञ्जयेद्बृंहयेच्चापि केशान्मूर्ध्निप्रलेपनात् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

नीलीभूशर्करायष्टी भुजगाञ्जनलेपिते ।
एरण्डदलबद्धे च मूर्ध्नि स्यात्केशरञ्जनम् ॥७१०॥

क्षीरोषितवितुषीकृत सितगुञ्जामानिकोन्मिश्रान् ।
कंसं महिषीक्षीरात्सततं दर्व्या विघट्टयन् विपचेत् ॥

दध्नस्ततः सुजातं नवनीतं सार्धपलभुजङ्गरसः ।
....................................॥

सममोंग्रास्थ्ययश्चूर्णं तत्समं त्रिफलारजः ।
स्तोकं नीलाञ्जनाचूर्णं षड्गुणत्रिफलाम्भसा ॥

त्रिगुणेन च तैलेन लोहपात्रे प्रमर्दितम् ।
चतुर्मासस्थितं धान्ये बलाकानपि रञ्जयेत् ॥

धात्रीबृन्दा....भृन्नीरे क्षीरश्लक्ष्णायश्चूर्णं गुञ्जाजटाभ्याम् ।
तैले पुष्पं पच्यमाने जपाया दद्याद्रागार्थं रोहयेद्रञ्जयेच्च ॥

ब्राह्मणद्विट् शिरोरोगी भवेत्तत्र हिरण्मयम् ।
उपवीतं निवीतञ्च राजतश्चोत्तरीयकम् ॥

यज्ञोपवीतं परमं पुरा देवैर्विनिर्मितम् ।
ब्रह्मणा विष्णुना चापि रुद्रेण च विशेषतः ॥

पूजयामि परं दिव्यं मम पापक्षयं कुरु ।
अनेन मन्त्रेणाभ्यर्च्य कुङ्कुमेनानुलेपितम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

ब्रह्मजज्ञानमन्त्रेण समिद्भिः खदिरार्कयोः ।
प्रजापतेनेत्याज्येन तिलैर्व्याहृतिभिः पुनः ॥

दद्याद्धोमकृते मन्त्रं वक्ष्यमाणमनुस्मरन् ।
प्रजापतेस्त्वं सहजमग्र्यमायुष्करं नृणाम् ॥७२०॥

ब्रह्मणा विधृतं पूर्वं रुद्रेणाप्यथ विष्णुना ।
ब्राह्मणद्वेरजनितं पूर्वकर्मविपाकतः ॥

यत्पापमतितीव्रं मे ब्रह्मन् सर्वमपानुद ।
वेदना दुःसहा मह्यं या मे शिरसि वर्तते ॥

यज्ञोपवीतदानेन तुष्टो मह्यं भवाद्य मे ।
जुहुयाद्रुद्रसूक्तेन होमं मुह्यद्दचं जपेत् ॥

चरेच्चान्द्रायणं दद्याच्छिरोरोगेषु काञ्चनम् ।
एवं जत्रूर्ध्वरोगानामेकविंशच्छतद्वयम् ॥७२४॥

इति चतुर्थोऽधिकारः

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अथ सर्वशल्यचिकित्साधिकारः

गात्रैकदेशे दोषास्तैः पृथग्ग्रथित उन्नतः ।
त्वङ्मांससंस्थः सङ्घातः शोफः स्याद्विषमः समः ॥

क्रमात्सदोषैर्भृशशूलरागः शोफोस्रतः पित्तसमोऽतितृष्णः ।
सर्वाकृतिः सर्वभवः क्षताद्यैः पित्तास्रलक्षाधिकलक्षितश्च ॥

शोफः सामः सवर्णस्थिरकठिनतरः पच्यमानो विवर्णो
रागी रक्तोदतृडरुचिसहितो द्रावयेत्स्त्यानमाज्यम् ।
पक्वेल्पावदनास्यास्तितवलिमृदुतापूयसञ्चारयुक्तः
पाकेतीते वलीभिरुपचितः शीर्णरोमास्थिमांसः ॥

शूलयुक्तेऽनिलाद्दाहः पित्ताच्छोपकफोदयात् ।
शिरोरक्ताच्च पाकः स्यादतो दोषैः सशोणितैः ॥

शोफे कफोत्थे समुपैति पाकं गम्भीरमस्पर्शविपाकलिङ्गम् ।
शीतं घनस्पर्शमशल्यतोदं तं रक्तपाकं भिषजो वदन्ति ॥

स एव शोफो विवृतः प्रायः पाकवशाद्व्रणः ।
स च द्विधा निजागन्तुदुष्टशुद्धविभेदतः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

निजो दोषैः शरीरोत्थैं रागन्तुर्बाह्यहेतुकः ।
दोषैरधिष्ठितो दुष्टः शुद्धस्तैरनधिष्ठितः ॥

संवृतत्वं विवृतता काठिन्यं मृदुताऽपि वा ।
अत्युत्सन्नावसन्नत्वमत्यौष्ण्यमतिशीतता ॥

रक्तत्वं पाण्डुता कार्ष्ण्यं पूतिपूयपरिस्रुताः ।
पूतिमांसशिरास्नायुच्छन्नतोत्सङ्गितार्तिरुक् ॥

संरम्भदाहश्वयथुकण्ड्वादिभिरुपद्रुतः ।
दीर्घकालानुबन्धश्च विद्याद्दुष्टव्रणाकृतिम् ॥१०॥

दुष्टव्रणस्यात्य विशिष्टलिङ्गं विशेषतः पञ्चदशप्रकाराः ।
एकैकदोषद्वयसन्निपातैस्तैरेव युक्तैरसृजा सृजा च ॥

व्रणेऽनिलेनासितशुक्लवर्णः कपोतभस्मास्थिसमप्रभावः ।
पुलाकमांसोदकमस्तु तुल्यं स्रवेत्सतोदं तनु रूक्षमल्पम् ॥

पीतारुणं तिलजकिंशुकभस्मवारि मूत्राभमुष्णमतिरुग्बहुशीघ्रजं च ।
पित्तात्कफेन कठिनो धवलोऽतितोदः श्वेतं घनं सृजति भूरिसमेतकण्डूः ॥

प्रवालरक्तो रक्तेन सुरक्तं पूयमुद्धरेत् ।
वाजिस्थानसमो गन्धे युक्ते लिङ्गैश्च पैत्तिकैः ॥

द्वाभ्यां त्रिभिश्च तैः शास्त्रैर्विद्याल्लक्षणसङ्करात् ।
वाजिप्रभो मृदुश्लक्ष्णश्यानाष्टः पिटकासमः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

किञ्चिदुन्नतमध्यो वा व्रणः शुद्धोऽनुपद्रवः ।
त्वगामिषशिरास्नायुसन्ध्यस्थीनि व्रणाशयाः ॥

कोष्ठो मर्म च तान्यष्टौ दुःसाध्यान्युत्तरोत्तरम् ।
सुसाध्यः सत्वमांसाग्नि वयो बलवतो व्रणः ॥

पत्रौ दीर्घत्रिषट्कश्च चतुरस्राकृतिश्च यः ।
तथा स्फिक्पायुमेढ्रोष्ठ पृष्ठान्तर्वक्त्रगण्डजाः ॥

कृच्छ्रसाध्योक्षिदशन नासिकापाङ्गनाभिषु ।
सावना जठर श्रोत्र पार्श्वकक्षस्तनेषु च ॥

कुष्ठिनां विषजुष्टानां शोषिणां मधुमेहिनाम् ।
व्रणाः कृच्छ्रेण सिद्ध्यन्ति येषां च स्युः व्रणे व्रणाः ॥२०॥

नैव सिद्ध्यन्ति वीसर्पज्वरातीसारकासिनाम् ।
पिपासिनामनिद्राणां श्वासिनामविपाकिनाम् ॥

भिन्नो शिरः कपालो वा मातुलुङ्गस्य दर्शने ।
यो वातजो न शूलाय स्यान्न दाहाय पित्तजः ॥

कफजो न च पूयाय ....र्मसरुजे न यः ।
अचूर्णकीर्णकर्णाभो यत्राकस्माच्च दृश्यते ॥

रूपं शक्ति ध्वजादीनां सर्वांस्तान्वर्जयेद्व्रणान् ।
स्नायुच्छेदाच्छिरश्छेदाद्गम्भीर्या क्रिमिभक्षणात् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अस्थिभेदात्सुशल्यत्वात्सविषत्वादतर्कितान् ।
मिथ्याबन्धादतिस्नेहाद्रौक्ष्याद्रोमादिघट्टनात् ॥

क्षोभादशुद्धकोष्ठत्वात्सौहित्यादतिशर्करात ।
व्रणो मिथ्योपचाराच्च नैव साध्यो परोहति ॥

कपोतवर्णप्रतिमो यस्यान्तः क्लेदवर्णितः ।
स्थिरश्चापिटकावन्यो रोहतीति तमादिशेत् ॥

अतत्व शोफावस्थायां यथा सन्नं विशोधनम् ।
योऽयं शोफो हि शुद्धानां व्रणश्चाशु प्रशाम्यति ॥

कुर्याच्छीतोपचारं च शोफावस्थस्य सन्ततम् ।
दोषाग्नि रग्निवत्तेन प्रयाति सहसाशनम् ॥

शोफव्रणे च कठिनो (ने) विवर्णे वेदनान्विते ।
विषयुक्ते विशेषेण जलूकाद्यैरसृग्घरेत ॥२०॥

दुष्टेस्रोपहृते सद्यः शोफरागरुजां समः ।
हृते हृते च रुधिरे सुशीतैः स्पर्शवीर्ययोः ॥

श्लक्ष्णस्तदुद्भवः पिष्टैः क्षीरेक्षुखरसद्रुतैः ।
शतधौतघृतोपेतैर्मुहुरन्यैरशोषिभिः ॥

प्रतिलोमहितो लेपः सेकाभ्यङ्गाश्च तत्कृताः ।
तपसा पिहितो ह्युष्मा रोमकूपैरनावृतः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

लेपाद्विनैव निर्याति रात्रौ नालेपयेत्ततः ।
न च पर्यूषितं लेपं दद्याद्भूयस्तमेव वा ॥

व्यम्लः पर्युत्रितोऽपिस्या दुष्णवीर्यस्तथेतरः ।
न्यग्रोधोदुम्बराश्वत्थ प्लक्षवेतसवल्कलैः ।
प्रलेपो भूरिसर्पाभिः शोफनिर्वापणः परम् ॥

प्रलेपः ससितस्तद्वत्यक्तलेपमधुकं घृतम् ।
यथाम्बुभिः सिच्यमानः शान्तिमग्निर्नियच्छति ॥

दोषाग्निरेव सहसा प्रलेपाद्यैः प्रयोजितैः ।
वातव्रणानां स्तब्धानां कठिनानां (?) महारुजाम् ॥

स्रुतासृजां च शोफानां व्रणानामपि चेद्दशाम् ।
अनूपदेशवासाद्यैः स्वेदं सोमास्तिलाः पुनः ॥

भृष्टा निर्वापिताः क्षीरे तत्पिष्टारोगरुद्धराः ।
विलीयते न चेदेवं ततस्तमुपनाहयेत् ॥

अतिदग्धस्तथा शान्ति विदग्धः पाकमश्नुते ।
अतसीतिलपुष्पाणि किण्वचित्रकसर्षपैः ॥४०॥

शणाशिग्रूफलागार धूममूलकसक्तुभिः ।
दधि तक्रसुराचुक्र धान्याम्लाद्यम्लपेषितैः ॥

अन्यैर्वोष्णैः सलवणैः स्निग्धैरुत्कारिकां पचेत् ।
तथा तिलोष्णएरण्ड पत्रेणाच्छाद्य नाहयेत् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

उपनाहे हिता तैलघृताक्ता सक्तुपिण्डिका ।
शालीतिलैरण्डफला भृष्ट्वा पिष्ट्वा घृतेन कर्तव्तः ॥

।

सन्तर्पणादयोऽयस्स्यादुपनाहो ग्रन्थिशोफघ्नः ॥

स्विन्नैः ....पूतीक धुत्तूरलिकुचच्छदैः ।
उपनाहः प्रशस्तस्य द्व्यष्णशोफश्च पाचने ॥

एवं पाके मुखे शोफे यथेष्टं भोजयेन्नरम् ।
पाचनार्थं तथा पाकशस्त्रार्तिसहनाय च ॥

सुपक्वे पिण्डिते शोफपीडनैरुपपीडयेत् ।
दारणं दारणार्हस्य सुकुमारस्य चेष्यते ॥

अल्पसत्वेऽबले बाले पाकाद्वात्यर्थमुद्धते ।
दारणं मर्म सन्ध्यादि स्थिते चान्यत्र पाटनम् ॥

गुग्गुल्वतासिगोदन्तस्वर्णक्षीरी कपोतविट् ।
क्षीरौषधानि रश्च पक्वशोथविदारणः ॥

यवक्षारेण धुत्तूरक्षारो गुञ्जाफलेन वा ।
क्षारो वापि हरिद्रायाः कांस्ये तैलेन मर्दितः ॥५०॥

प्राक्शस्त्रकर्मण श्रेष्टं भोजयेदन्नमातुरम् ।
पानकं पाययेन्मद्य तीक्ष्णं यो वेदनासहः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

न मूर्च्छत्यन्नसंयोगान्मत्तः शस्त्रं न कुप्यते ।
अन्यत्र मूथगर्भार्शो मुखरोगोदराजरात् ॥

अथाहृतोपकरणं वैद्यः प्राङ्मुखमातुरम् ।
समुखो यन्त्रयित्वा तु न्यसेन्मर्मादि वर्जयेत् ॥

अनुलोमं सुनिशितं शस्त्रेणापूयदर्शनात् ।
सकृदेवाहरेत्तच्च पाके तु सुमहत्यपि ॥

पाटयेत्त्र्यङ्गुलं सम्यक् द्व्यङ्गुलत्र्यङ्गुलान्तरम् ।
पूरयित्वा सम्यगैषण्या परितः सुनिरूपितम् ॥

अङ्गुलानालवालैर्वा यथादोषं यथाशयम् ।
यतो गतां गतिं विन्द्यादुत्सङ्गो यत्र यत्र च ॥

तत्र तत्र व्रणं कुर्यात्सुविभक्तं निराशयम् ।
आयतश्च विशालश्च तथा दोषो न तिष्ठति ॥

तिर्यक्छिन्द्याल्ललाटे च दन्तवेष्टकजत्रुणि ।
कुक्षिकक्षौ....दोष्ठ कपोलगलवंक्षणे ॥

शस्त्रेऽवचारिते वाभिः शीताम्भोभिश्च रोगिणम् ।
आश्वास्य परितोऽङ्गुल्या प्रतिपाद्य व्रणं ततः ॥

क्षालयित्वा कषायेण प्लोतेनाम्भोऽपनीय च ।
गुग्गुल्वगरुसिद्धार्थ हिङ्गुसर्जरसान्वितैः ॥६०॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

धूमयेत्पटुषड्गन्धा निम्बपत्रे घृतशृतैः ।
बला कल्काज्यमधुभिर्यथास्वं भेषजेन च ॥

दिग्धां वर्तिं ततो दद्यात्तैलेनाच्छादयेच्च ताम् ।
घृताक्तैः सक्तुभिश्चोर्ध्वं घनांकबलिकान्ततः ॥

निधाययित्वा बध्नीयात्यच्छेन सुसमाहितः ।
पार्श्वे सव्येऽपसव्येनाधस्तान्नैव चोपरि ॥

ततो रुगाधिकारोक्तं तस्याचारं समादिशेत् ।
व्रणे श्वयथुरायासात्स च रागश्च जागरात् ॥

तौ चरुक्च दिवास्वापात्ताश्च मृत्युश्च सङ्गमात् ।
भोजनन्तु यथासात्म्यं यवगोधूमपष्टिकाः ॥

मसूरमुद्गतुवरी जीवन्ती सुनिष्रण्णकान् ।
बलामूलकवार्ताक तण्डुलीयकवास्तुकम् ॥

कारवेल्लकर्कोट पटोलकटुकाफलान् ।
सैन्धवं दाडिमं धात्री घृततप्तं हिमं जलम् ॥

जीर्णशाल्योदनं स्निग्धमल्पमुष्णोदकोत्तमम् ।
भुञ्जानो जाङ्गलैर्मांसैः शीघ्रं व्रणमपोहति ॥

तृतीयेऽह्नि पुनः कुर्याद्व्रणकर्म च पूर्ववत् ।
प्रक्षालनादि दिवसे द्वितीये नाचरेत्तथा ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तीव्रव्यथोतिग्रथितश्चिरात्संरोहति व्रणः ।
कुष्ठिनामग्निदग्धानां पिटकामधुमेहिनाम् ॥७०॥

कर्णिकाश्चोन्दुरुविषे क्षारदग्धा विषान्विताः ।
मांसा केसरबद्धव्या गुदपाके च दारुणे ॥

शीर्यमाणः सदग्दाहः शोफावस्थाविसर्पिणः ।
अङ्गच्छेदे शिरास्नायु व्याप (य) तोसृगतिस्रुतिः ॥

रुजातिवृद्धिर्दरणं विसर्पो वा क्षतोद्भवः ।
विवर्णान्पि (त्पि) च्छिलान्पूति गन्धान् क्लेदरुजावतः ॥

व्रणानशुद्धान्विज्ञाय शोधनैरेभिराचरेत् ।
सप्तसु क्षालनाद्येषु सुरसारग्वधादिकौ ॥

भृशदुष्टव्रणे योज्यौ मेहे कुष्ठव्रणेषु च ।
अथवा क्षालनं क्वाथः पटोलीनिम्बपत्रजः ॥

सुविशुद्धेप्यशुद्धे वा न्यग्रोधादित्वगुद्भवः ।
पटोलतिलयष्ट्याह्व त्रिवृद्दन्तीनिशाद्वयम् ॥

निम्बपत्राणि चापेयस्सपटुव्रणशोधनम् ।
व्रणान्विशोधयेद्वर्त्या सूक्ष्मास्यात्सन्धिवर्त्मगान् ॥

कतकात्त्रिवृताद्दन्तिलाङ्गुलीमधुसैन्धवैः ।
निम्बपत्त्रनिशाकल्कः सतिलो माक्षिकान्वितः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

त्रिकट्व इति विख्यातो व्रणशोधनरोपणः ।
अलर्कपत्रवर्षाभूर्गण्डाबीजकृतोऽथ वा ॥

जलगन्धाजशृङ्गी च गवाक्षी लाङ्गली निशा ।
पूतीकचित्रकं पाठा पटोलीवेल्लरेणुकाः ॥८०॥

कटुत्रयं यवक्षार लवणानि सुराष्ट्रजः ।
निकुम्भकुम्भकासीस हरितालमनश्शिलाः ॥

क्षालनाल्लेपतैलाज्यचूर्णवर्तिषु भेषजम् ।
शुष्कमांसे तु गम्भीरे व्रण उत्सादनं हितम् ॥

न्यग्रोधपद्मकाभ्यामश्वगन्धाबलातिलैः ।
उत्सन्नदुष्टमांसानां व्र णानामवसादनम् ॥

जातीमुकुलकासीस मनोह्वालवणाग्निकैः ।
उत्सन्नमांसात्कठिनात् कण्डूयुक्तांश्चिरोत्थितान् ॥

व्रणान्सुदुःखसाध्यांश्च शोधयेत्क्षारकर्मणा ।
स्रवतोऽस्थिरजामूत्रं ये चान्ये रक्तवाहिनः ॥

छिन्नाश्च सन्धयो येषां यथोक्तैर्ये च शोधनैः ।
शोध्यमाना न शुद्ध्यन्ति शोध्याः स्युस्तेऽग्निकर्मणा ॥

आरक्षया व्रणे यस्मिन्माक्षिका निक्षिपेत्क्रमात् ।
ते भक्षयन्तः कुर्वन्ति रुजाशोफास्रसंस्रवान् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सुरसादि प्रयुञ्जीत तत्र धावनपूरणे ।
सप्तपर्णकरञ्जार्क निम्बराजादनत्वचः ॥

गोमूत्रकल्कि (ल्क) तां लेपः सेकः क्षाराम्बुना हितः ।
प्रच्छाद्य मांसवेशा (श्या) वा व्रणांस्तानाशु निर्हरेत् ॥

क्षीरं कुरूटकास्फोट तृचतोम्बरसम्भवम् ।
सकुरूटकदुग्धं वा श्वघ्निमूलं क्रिमिप्रणुत् ॥९०॥

व्रणस्योदरस्थं क्रिमिव्रातमुग्रं
वटक्षीरबिन्दुर्निषिक्तो निहन्ति ।
अलब्धे च तस्मिन् सुपिष्ठा च मृ (घृ) ष्टि
सुधान्वप्रयावन् वधाय क्रिमीणाम् ॥

कार्पासफलगेहधूमवकुलं गुञ्जाफलं शङ्खजं
क्षारं वा नर्धीं च नागसहितां पथ्यां रसे किंशुके ।
पिष्ट्वा कंसयुगेन तैलसहितं घृष्टेयमाकार्ष्यतः
क्षिप्रं हन्ति रसक्रिया चिरभवान्दुष्टव्रणान्संसृतान् ॥

व्रणानामपि शुद्धानां रोपणानि प्रयोजयेत् ।
सास्रपित्तविषागन्तु गम्भीरान् सोष्मणो व्रणान् ॥

क्षीररोपणभैषज्य शृतेनान्येन रोपयेत् ।
रोपणौषधसिद्धेन तैलेन कफवातजान् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

द्वे पञ्चमूले वर्गश्च वातघ्नो वातिके हितः।
न्यग्रोधपद्मकाद्यौ तु तद्वत्पित्तप्रदूषिते ॥

आरग्वधादिः श्लेष्मघ्नः कफोन्मिश्रस्तु मिश्रके।
एभिः प्रक्षालनालेपघृततैलरसक्रियाः ॥

चूर्णो वस्तिश्च संयोज्य व्रणे सप्त यथायथम्।
पित्तविद्रधिवीसर्प शोफकुष्ठयुतानि च ॥

सर्वव्रणेषु योज्यानि पाने सेके प्रलेपने।
दूर्वास्वरसकल्काभ्यां सिद्धं तैलश्च रोपणम् ॥

जातीनिम्बपटोलपत्रकटुकादार्वीनिशाशारिवा
मञ्जिष्ठाभयतुत्थसिक्थमधुकैर्नक्ताह्वबीजैः समैः।
सर्पिस्सिद्धमनेकसूक्ष्मवदनाममर्मास्रितस्राविणो
गम्भीरा सरुजो व्रणाः सगतिका शुद्ध्यन्ति रोहन्ति च ॥

निम्बलकानिसस्तुक्करञ्यजरकुरूटके शृतं तैलम्।
कल्कितलाङ्गूल्यनलं व्रणशोधनरोपणं शस्तम् ॥१००॥

दिनेन्द्रवल्ल्याः स्वरसे विपक्वं तच्चर्मकल्केन पुनर्नवस्य।
सारे च तैलं व्रणरोपणार्थं संशोधनार्थञ्च वदन्ति तज्ज्ञाः ॥

महावृक्षार्कजक्षीरे मधूच्छिष्टेन साधितम्।
तैलं सकृत्प्रयोगेण व्रणशोधनरोपणम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

निम्बाकुलीवृषकुरम्यकनग्नरेचिचिञ्चात्रणघ्नसुवहाखरमञ्जरीणाम् ।
निम्बस्य वापि वनजस्य रसे विपक्वं तैलं परान्तकमिदं व्रणरोपणाय ॥

दुग्धे कल्केन शृतं वर्षाभूभूकदम्बमूलसुवा ।
तैलं रोपयति द्राग्व्रणमपि गाढं सपूयमपि ॥

समानस्थिरमांसानां त्वक्स्थानां चूर्णमिष्यते ।
ककुभोदुम्बराश्वत्थ जम्बूफलजलोघ्रकैः ॥

त्वचमाशु न गृह्णन्ति त्वक्चूर्णैश्चूर्णिता व्रणाः ।
त्रिफला मधुकं लोध्र माञ्जिष्ठाबिल्ववेशिका ॥

समङ्गा धातकी लाक्षा पलाशार्जुनशाल्मली ।
निर्यासश्चापि तच्चूर्णं व्रणानां रोपणं परम् ॥

कठिनत्वं व्रणा यान्ति सारैर्गन्धैश्च धूपितैः ।
दुत्तूरकफणाश्वत्थनिम्बचिञ्चामृतार्जुनान् ॥

जम्बूकरञ्जमुषवी कुरूषकपुनर्नवान् ।
शाल्मल्यनन्ताकार्पास कदम्बा....पद्मतः ॥

अ....धश्वेरं ताम्बूलं स्नुक्पुलासापृथग्दलैः ।
उपनाहं प्रयुञ्जीत व्रणशोधनरोपणम् ॥११०॥

पद्मकं पद्मकिञ्जल्कं दार्वीमूर्वासितोपलम् ।
मेदा समङ्गायष्ट्याह्व प्रलेपो व्रणसाधकः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

लाजामनोह्वा मञ्जिष्ठा हरितालनिशाद्वयैः ।
प्रलेपः सघृतः क्षौद्रस्त्वग्निशुद्धिकरं परम् ॥

ध्यामकाश्वत्थनिचुल मुद्गलाक्षाथं गैरिकम् ।
सहेमचामृतासङ्गः कासीसञ्चेति वर्णकृत् ॥

कालेयकलनामास्थि हेमकालारसोत्तमैः ।
लेपः सगोमयरसः स्यात्सवर्णकरः परः ॥

दग्धया....पसत्त्वानां श्लक्ष्णचूर्णितया वचा ।
भल्लाततैलप्लुतया शुक्लमालेपयेद्व्रणम् ॥

कपित्थमांसमुद्धृत्य मूत्रस्याजस्यपूरयेत् ।
क्षिपेच्चात्र मनोह्वाथ वंशनीलाश्वरोचनाः ॥

कासीसञ्च प्रपुन्नाटं मांसं न्यस्तं ततो भुवि ।
अथार्जुनस्य त्वक्शुक्ले व्रणे लेपः सवर्णकृत् ॥

त्रिफलामार्कवोलाक्षा कासीसं लोहजं रजः ।
लेपोऽयमचिरात्कुर्याद्व्रणकार्ष्ण्यं नवत्वचि ॥

रोचनाकुङ्कुमाम्रास्थि तुत्थं शाल्मलिकण्टकाः ।
कालेयकञ्च सावर्ण्यं कुर्युर्न्यासः समासतः ॥

सिद्धं भृङ्गरसे धात्री दन्ती दन्तमर्षीयुतम् ।
तैलमांस.... पात्रस्थं केश्यं स्याद्व्रणकार्श्यकृत् ॥१२०॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

दग्धो वारणदन्तोन्तर्धूमं तैलं रसाञ्जनम् ।
रोमसञ्जननो लेपस्तद्वत्तैलपरिप्लुताम् ॥

....चर्व्यां नखरोमास्थित्वक्शृङ्गखुरजामपि ।
नवं धान्यं तिलान्माषान् मद्यं मांसमजाङ्गलम् ॥

क्षीरेक्षुविकृतीरम्लं लवणं कटुकं त्यजेत् ।
यच्चान्यदपि विष्टम्भि विदाहि गुरुशीतलम् ॥

स्थानासनं चङ्क्रमणमुच्चैर्भाषणमेव च ।
वर्गोऽयं नवधान्यादि व्रणि च....सर्वदोषकृत् ॥

नचैवं त्वरमाणोन्तः सशोषमुपनाहयेत् ।
सोल्पेनाप्युपचारेण भूयोऽपि (वि) कुरुते यतः ॥

रूढेऽप्यजीर्णव्यायामव्यवायादीनि वर्जयेत् ।
आदरेणानुवर्त्योऽयं मासान् षट् सप्तवातिभिः ॥

यः सेवते व्रणविरु........यः पक्वं च शोफमुभयोर्व्रणमांसदाहान् ।
पूयस्य दूरगमनाद्गतिरेवनाडी स्यात्पञ्चधा विततसंयुतदोषशल्यैः ॥

वातात्सरुग्भवति सूक्ष्ममुखी विवर्णा
योगानुवृद्धमधिकं स्रवति क्षपायाम् ।
पित्तात्तृषा ज्वरकरी परिदाहयु....
........वत्यधिकमुष्णमहस्सु चापि ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

घनपिच्छिलसंस्राव्य ....कण्डूरकफात् ।
निशिचाप्यधिकक्लेदा सर्वैः सर्वाकृतिं त्यजेत् ॥

अन्तः शल्यमनाहृतं तु............
करोति नाडीं वहते च सा स्वयम् ।
फेनानुविद्धं तनुमुष्णमल्पं
स्र ....यं सरुजं च नित्यम् ॥१३०॥

उपनाह्यानिलां नाडीं पाटितां त्वथ लेपयेत् ।
प्रत्यक्पुष्पी फलयुतैस्तिलैः पिष्टैश्च सैन्धवैः ॥

पित्ते तु तिलमञ्जिष्ठानागदन्तीनिशाह्वयैः ।
श्लेष्मिकां तिलसौराष्ट्रीं निकुम्भारिष्टसैन्धवैः ॥

शल्यजां तिलमध्वाज्यैर्लेपयेच्छिन्नशोधिताम् ।
अस्त्रीकृत्यायमैषण्या भित्वान्तः सम्यगैषिताम् ॥

क्षारपीतेन सूक्ष्मेण बहुशो धारयेद्गतिम् ।
व्रणेषु दुष्टसूक्ष्मास्यगम्भीरादिषु साधनम् ॥

यावत्यो यानि तैलानि तं नाडीष्वपि शस्यते ।
पिष्टं च श्रीफलं लेपान्नाडीव्रणहरं परम् ॥

घोण्टाफलत्वग्लवणं खलाजं पूगस्य पत्रं वनितापयश्च ।
स्नुह्यर्कदुग्धान्वित एष कल्को वर्तीकृता हन्त्यचिरेण नाडीः ॥

अर्काङ्कुरद्विरजनीमरिचोपकुल्या यष्ट्याह्ववह्निकटुकागृहधूमवेल्लैः ।
भल्लातकेन लवणेन च भृङ्गसारे तैलं शृतं हरति वातकफोत्थनाडीम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

त्रिवृत्तेजोवती दन्ती मञ्जिष्ठा रजनीद्वयम् ।
तार्क्ष्यं निम्बं च पत्रं च लेपो नाडीव्रणापहः ॥

जुष्टसद्योव्रणैरङ्गं त्रिविधं स्यात्समासतः ।
छिन्नं भिन्नं विदलितं घातैर्धाराग्रमूढजैः ॥

सद्यः सद्योव्रणान् सीव्येद्विवृतानभिघातजान् ।
व्रणो निःशोणितौंष्ठो यः किञ्चिदेवात्रलिप्य तम् ॥१४०॥

सञ्जातरुधिरं सीव्ये सन्धानद्यस्य (?) शोणितम् ।
शीतेन वारिणा सिञ्चेच्छतधौत घृतेन वा ॥

दूर्वापामार्गसुवहावाकुचीकाकमाचिकाः ।
निम्बाखुकर्ण्यौ च रसाः शणितिस्थपिते हिताः ॥

निष्पावार्जुनपत्राणां सपटुर्दोषसाधनः ।
जग्धस्यशरपुङ्खार्ति निष्ठ्यूतरु रसोऽथवा ॥

साज्येन मधुना सिञ्चेन्मधुयष्टिघृतेन वा ।
तीव्रव्यथं कवोष्णेन बलातैलेन वा पुनः ॥

क्षतोष्मणो निग्रहार्थं तत्काले निस्रुतस्य च ।
कषायशीतमधुरस्निग्धालेपादयो हिताः ॥

ससर्पिस्तिलमज्जा च पत्रं वा मोदकत्वचम् ।
उदकाशाकमूलं वा लिम्पेज्ज्येष्ठानुपेवितम् ॥

LxI
15N72

Vaidyaraj Zindi Bhatji
National Ayurvedic Library
Punjabi Bagh, New Delhi-26
000482

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पाचितलिकुचकत्रोष्णस्वरसेन विदाह्यबध्नीयात् ।
सद्यो व्रणं समस्तं विदह्य वा छगण....डेन ॥

बद्ध्वा (?) गत्तुं व्रणं सद्योघृतक्षौद्रसमन्वितम् ।
तत्क्रियाप्रयोक्तव्या पित्तरक्तोष्मनाशनी ॥

तालस्य पेयां ऋमुकस्य नालं लाक्षाञ्जने सर्वरसं कपित्थम् ।
पथ्यां च सञ्चूर्ण्य परिक्षतानां क्षतेषु दत्त्वा परिलङ्घनीयम् ॥

इति सप्ताहिकः प्रोक्तः सद्योव्रणहितो विधिः ।
सप्ताहाद्गतवेगे तु पूर्वोक्तविधिमाचरेत् ॥१५०॥

मूढप्रहाराभिहते पतिते विषमोच्चकैः ।
कार्यं वातास्रजित्तृप्तिर्मर्दनाभ्यङ्गशोधनैः ॥

विश्लिष्टदेहं मथितं क्षीणमर्महतं द्दतम् ।
आयसे तैलपूर्णायां द्रोण्यां मांसरसाशितम् ॥

सद्योव्रणघ्नं यत्सर्पिर्यदुक्तं पित्तविद्रधौ ।
वातघातादिभिर्द्वेधा भङ्गोस्थसन्ध्यसन्धितः ॥

भग्नसंख्यापनापायैस्तैः संस्थाप्य निश्चलम् ।
पाटेनाथ घृताज्येन परिवेष्ट्योपरि क्षिपेत् ॥

वयदिव कल्कं वांशं वा मध्यमं बन्धमाचरेत् ।
शिथिलेन हि बन्धेन सन्धेः स्थैर्यं न जायते ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

गाढेनातिरुजादाह पाकश्वयथुसम्भवः ।
त्यहात्त्र्यहाद्दतौ घर्मे सप्ताहाद्योजयेद्धिमे ॥

साधारणे तु पश्चाहात् भङ्गे दोषवशेन वा ।
न्यग्रोधादिकषायेण ततः शीतेन सेचयेत् ॥

तं पञ्चमूले सिद्धेन पय ....तु सवेदनम् ।
सुखोष्णं वा वचार्थ्यं स्याच्चक्रतैलं विजायता ॥

विभज्य देशकालौ च वातघ्नौषधसंयुतान् ।
प्रततं लेपसेकांश्च विदध्यादभृशशीतलान् ॥

घृष्टिक्षीरं ससर्पिष्कं मधुरौषधसाधितम् ।
प्रातः प्रातः पिबेद्भग्नो ....लाजया युतम् ॥१६०॥

सव्रणस्य तु भग्नस्य व्रणे मधुघृतोत्तरैः ।
कषायैः प्रतिसार्योऽथ शेषो भङ्गोदितो विधिः ॥

लम्बानि व्रणमांसानि प्रलिप्य मधुसर्पिषा ।
सन्दधीत व्रणान्वैद्यो बन्धनैश्चोपपादयेत् ॥

तान्व्रणान् सुदृढान् ज्ञात्वा फलिनीलोध्रकट्फलैः ।
समङ्गाधातकीयुक्तैश्चूर्णितैरवचूर्णयेत् ॥

उपाचरेद्यथास्वं च विसर्पादीनुपद्रवान् ।
इति भग्न उत्क्रान्त स्थिर धौतौ ऋतौ हिमे ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मांसलस्याल्पदोषस्य सुसाधो दारुणान्यथा ।
सामान्यं साधनमिदं विशेषो वक्ष्यते ततः ॥

नखसन्धिसमुत्क्लिष्टं रक्तानुगतमानया ।
अवमध्य स्रुते रक्ते शालिपिष्टेन लेपयेत् ॥

भग्नां सन्धिविमुक्तां वा कृत्वा पूर्ववदङ्गुलीम् ।
तनुनावेष्ट्य पट्टेन घृतसेकं प्रदापयेत् ॥

चक्र........तिमां नचेदूर्वस्थि निर्गतम् ।
....वान्ते ऊर्ध्वमस्त्राच्च कटिभग्नं चिकित्सकः ॥

मुसलेनोत्क्षिपेत्कट्यां मांससन्धौ त्रिसाङ्गिते ।
स्थानं स्थितं च बध्नीयात् स्वस्तिकेन समाहितः ॥

कौर्परं तु भिषक्सन्धिमङ्गुष्ठेनानुमार्जयेत् ।
स....ज्य ततः सन्धिं पातयेत्कूर्पराच्च्युतम् ॥१७०॥

प्रसार्योत्कुञ्चयेच्चैनं स्नेहसेकं च कारयेत् ।
प्राग्गोमयमयं पिण्डं धारयेन्मृण्मयं ततः ॥

मणिबन्धे च जान्वौ च गुल्फे चैष क्रियाक्रमः ।
उभे तले समे कृत्वा तलभग्नस्य देहिनः ॥

बध्नीयाच्चामतैलेन परिषेकं च कारयेत् ।
हस्ते जातबले कार्यो क्रमात्पाषाणधारणम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सन्नमुन्नामयेत्खिन्नमक्षकं मुसलेन तु ।
तयोन्नतं पीडयेच्च बध्नीयान्निबिडं ततः ॥

ऊरु तच्च विधातव्यं बहुभङ्गप्रसादनम् ।
ग्रीवायां तु विवृत्तायां प्रविष्टायामथापि वा ॥

अवद्वामग (?) हन्वोश्च प्रगृह्योन्नमयेत्ततः ।
समंक्कु....भिर्बध्नीयादुन्नतं शातयेच्च तम् ॥

हत्व (न्व) स्थीनि समानीय हनुसङ्गौ विसङ्गते ।
सादयित्वा....ते सम्यक् पञ्चाङ्गीबद्धमाचरेत् ॥

घृतं वातघ्नमधुरैः सिद्धं नस्यं च योजितम् ।
दन्तानभग्नांश्चलितान् सरक्तानवपाटयेत् ॥

वयस्स्थस्याम्बुभिः शीतैः परिषिच्य प्रलेपयेत् ।
बहिर्निर्वापणैः शीतैः सन्धानीयैरुपाचरेत् ॥

बलाद्वयक्षिते क्षीरे पद्मकादिशृतं घृतम् ।
नस्यगण्डूषयोर्योज्यं चलद्विजहितानि च ॥१८०॥

कल्कितैस्ताद्धितैश्चास्ये दन्तमांसानि लेपयेत् ।
तत्र त्रिमासान्भुञ्जीत रसान्नं कठिनं त्यजेत् ॥

नासां विवृत्तां सन्नां वा ऋजूकृत्य शलाकया ।
प्रत्येकं तु यन्त्रणार्थी तदा कीलाः कार्याः पञ्चनिबन्धनाः ॥

जङ्घोर्वोः पार्श्वयोर्द्वौ द्वौ तलएकश्च कीलकः ।
श्रोण्यां वा पृष्ठवंशे वा तक्षस्यचकयोस्तथा ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

विमोक्षे भग्नसन्धीनां विधिमेनां समाचरेत् ।
सन्धींश्चिरविमुक्तांस्तु स्निग्धखिन्नान् मृदूकृतान् ॥

युक्तैर्विधानैर्युक्ते च व्याधीन्स्वास्थानमाचरेत ।
असन्धिभग्ने रूढे तु विषमोल्बणसाधिते ॥

अपोध्य भग्नं यमते ततो भग्नवदाचरेत् ।
भग्नं नैति यथाप्रोक्तं प्रयतेत तथा भिषक् ॥

पक्वमांसशिरास्नायुः सन्धिश्लेष्मं न गच्छति ।
वातव्याधिविनिर्दिष्टान् स्नेहान् भग्नस्य योजयेत ॥

चतुष्प्रयोगान् बद्ध्यांश्च वस्तिकर्म च साधयेत् ।
तैलाज्यरसदुग्धाज्यैः पैष्टिकैरविदाहितः ॥

मात्रयोपचयाद्भग्नं सन्धिसंश्लेष्मकारिभिः ।
कट्वम्ललवणक्षार व्यायामातपमैथुनान् ॥

त्यजेद्वालं च रूक्षान्नं सन्धिविश्लेषणं यतः ।
.... ॥१९०॥

हैयङ्गवीनं सपटु प्रलिम्पेत् तीक्ष्णाम्रवल्कं तु तुषोदकेन ।
चिञ्चास्थिवल्कोषणकुम्भकार कपालपथ्या अपि भङ्गशोफे ॥

अनुल्वणमनाविद्धं स्वस्थाने प्रर्यवस्थितम् ।
अवेदनञ्च चेष्टायां भग्नं विन्द्यात्सुसाधितम्

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

कृष्णांस्तिलान् विरजसो दृढवस्त्रबद्धान्
सपक्षया वहति वारिणि वासयेत ।
संशोषयेदनुदिनं प्रतिसार्य चैतान्
क्षीरे तथैव मधुरक्वथिते कषाये ॥

पुनरपि पीतमयस्कांस्तां पूर्ववदेव रोचयेद्गाढम् ।
विगततुषानरजस्कान् सञ्चूर्ण्य चूर्णितैर्युञ्ज्यात् ॥

नलदवालकरोहितयष्टिका नखनिशिप्लवकुष्ठबलाभयैः ।
अगरुकुङ्कुमशारिबमुस्तकैः सरलसर्जरसामरदारुभिः ॥

पद्मकादिगणोपेतैस्तिल्पिष्टं ततश्च तम् ।
समस्तगण्डभैषज्यसिद्धदुग्धेन पीडयेत् ॥

शैलेयरास्नासुमतीकशेरु कालानुसारीनतपत्रलोध्रैः ।
सक्षारशुक्तैः सपयैः सदूर्वै स्तैलं पचेत्तं नलदादिभिश्च ॥

गन्धतैलमिदमुत्तमस्थितै र्यः सकृज्जयति चाशुविकारान् ।
वातपित्तजनितानतितीक्ष्णान् व्यापिनोऽपि विविधैरुपयोगैः ॥

कर्मविपाके: —

वृक्षाच्छेदा द्वृथायासात्स्याद्व्रणाः सर्वदेहिनाम् ।
सर्वकाम्यार्थसिद्ध्यर्थं प्रीतो भवतु वानरः ॥

वृथावृक्षच्छेदनेन या जाता व्राणिता मम ।
सर्वं विनाशय त्वं मे सर्वलोकनमस्कृत ॥२००॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मन्त्रमेवं पठन् विद्वान् चरेत्कृच्छ्रातिकृच्छ्रके ।
रुद्रसूक्तेनाज्यहोता यत्किञ्चिदनृतो जपेत् ॥

मलयताद्व्यङ्गुलिकेङ्गुलेथ भगन्दरः स्यात्पिटकापुरस्सरम् ।
असौ कथंचित्स्रसमागतैर्बलैः क्षते च साप्यष्टविधः प्रकीर्तितः ॥

वाताढ्या दारुणा सातिस्फुरणा पिटका च सा ।
पक्वा भगन्दरश्छिद्रैरुचस्तुच्छतयोनकः ॥

पित्ताधश्लेष्मणारागज्वरयामायनान्वितः ।
उष्णग्रीवे च पक्वे च मूर्च्छग्रीवो भगन्दरः ॥

स्थिरा स्निग्धा महामूला पाण्डुकण्डूमतीकफात् ।
पाकात्पिच्छात्परिस्रावी परिस्राविभगन्दरः ॥

श्यावा ताम्रा न चाघोत्रा घोररुग्वातपित्तजा ।
यावत्पास्या परिक्षेपि परिक्षेप्य गुदे स्थितः ॥

पाण्डुरा किञ्चि....श्यावा कृच्छ्रवाता कफानिलात् ।
सा पाकाद्रुजमत्याढ्या सोद्दज्त्रास्यो भगन्दरः ॥

पिटका तु सदा हि....कण्डूः स्यात्ककफपित्ततः ।
पक्वास्रयद्गतिमूले सोभ्यमर्शो भगन्दरः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पादाङ्गुष्ठसमार्वं वोंष्ठे नानाविधव्यथा ।
सापक्वा शम्बुकावर्ता शम्बुकावर्तसान्निभा ॥

उन्मार्गीस्यान्नशल्यादिभिन्ने पाकीत्यायौ जन्तवोऽश्नन्ति जाताः ।
वायौ मासं तत्र कुर्युः क्रमेण क्रुद्धादोषास्तीव्ररुग्दाहकण्डूः ॥२१०॥

षट् कृच्छ्रसाधनास्तेषां निचयः क्षयजौ त्यजेत् ।
पूर्वाणां वा वार्लि प्राप्तं सीवनीं वासमाश्रितम् ॥

विण्भूत्रमारुतवहं क्रिमिणं च भगन्दरम् ।
फेनपूयानिलवहः शल्यवानूर्ध्वनीवली: ॥

अन्तर्मुखः कृच्छ्रदत्तस्तथा कट्यस्थिसंस्थितः ।
तथान्यपिटकामेव तथा यत्नादुपाचरेत् ॥

शुध्द्यसृवस्रातिरेकाद्धिर्युद्धा साकं न गच्छति ।
यथान्तर्मुखमेभित्वा सम्यग्वस्त्रेण पाटयेत् ॥

बहिर्मुखं च निःशेषं ततः क्षारेण क्षालयेत् ।
अग्निनामाभिवक्सासाधु क्षारेणैवोष्णकन्धरम् ॥

नाडीराकान्तराः कृत्वा पाटयेच्छतमानके ।
तासु रूपासु शेषांश्च मृत्युर्जीर्णैर्गुडेऽन्यथा ॥

परिक्षेपिणि चाप्येवं नाड्युक्तक्षारसूत्रकैः ।
अर्शो भगन्दरे पूर्वमर्शांसि प्रतिकारयेत् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

त्यक्तोपचार्यः क्षतजः शल्यं दालवतस्ततः ।
आधारे तन्नथो दद्यात् क्रिमिघ्नं लेपभोजनम् ॥

सर्वत्र च बहुच्छिद्रैः छेदमालोक्य योजयेत् ।
गोतीर्थसर्वतोभद्रसार्थलाङ्गललाङ्गलान् ॥

पार्श्वौ गतौ च शत्रेण छेदो गोतीर्थको मतः ।
सर्वतः सर्वतोभद्रः पार्श्वच्छेद्योऽथ लाङ्गलः ॥२२०॥

पार्श्वद्वये लाङ्गलक स्समस्तांश्चाग्निना दहेत् ।
सास्रापमार्गान्निश्शेषान्नं तं विकरुते यतः ॥

येषां तु शस्त्रपतनाद्वेदना यदि जायते ।
तत्राणुतैलेनोष्णेन परिषेकः प्रशस्यते ॥

यतेत कोष्ठशुद्धौ च निक्तिस्यान्तरान्तरा ।
लेपो व्रणेभिवालास्थि त्रिफलारसकल्कितम् ॥

वटपत्राणि वर्षाभू गुडूचीनागरेष्टकाः ।
कल्केन्येषां कवोष्णेन लेपो हन्ति भगन्दरम् ॥

तद्वदेवायसे तैलं त्रपुसाम्लादिकाश्रितम् ।
ताम्बूलीकेतकीगुञ्चापत्रैः स्यादुपनाहनम् ॥

ज्योतिष्मतीमलयलाङ्गुलिकाग्निसेलु पाकात्रिभङ्गीकरवीरचासुधार्कैः ।
अभ्यञ्जनाय विपचेत भगन्दराणां निष्यन्दनाह्वयमिदं प्रथयन्ति तैलम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

श्रेष्ठा कुम्भनिकुम्भ....कटुका जार्जीगवाक्षीवचा
व्योषांकोलकरञ्जनिम्बरजनीकासीससिन्धूद्भवैः ।
मञ्जिष्ठाहयमारवह्निकिणिहाज्योतिष्मतीलाङ्गली
वारुण्युत्तरकंस्यकार्कमधुतैलासट्पलुङ्गीदलैः ॥

स्नुक्क्षीरमूलैः शतपुष्पयावक्काथे च कल्के च कृतैर्विपक्वम् ।
तैलं शृतं चार्बुदकुष्ठकानि भगन्दरघ्नं व्रणजन्तुजिच्च ॥

मधुकलोध्रकणाटरेणुका द्विरजनीफलिनी पटुशारिबाः ।
कमलकेसरपद्मकधावनी मदनसर्जरसामयरोहिताः ॥

सबीजपूरच्छदनैरेभिस्तैलं विपाचितम् ।
भगन्दरापचीकुष्ठं मधुमेहव्रणापहम् ॥२३०॥

मधुतैलयुताविलङ्गसारः त्रिफलामागधिकाकणाश्च लीढाः ।
क्रिमिकुष्ठभगन्दरप्रमेह क्षतनाडीव्रणरोपणा भवन्ति ॥

अमृतात्पटवेल्लवास्तुकं कलिपथ्यामलकानि गुग्गुलुः ।
क्रमवै.... मिदं मधुप्लुतं पिटकास्थौल्यभगंदरं जयेत् ॥

गुग्गुलुपञ्चपलं पलिका मागधिकात्रिफलाश्च पृथक्स्यात् ।
त्वक्त्रुटिकर्षयुतं मधुलीढं कुष्ठभगन्दरनाडिगतिघ्नम् ॥

निर्गुण्डीवरणैरण्ड वह्न्यम्भस्तैलसिन्धुमत् ।
आर्द्रकस्वरसे सिद्धं कल्कैर्वा पाययेद्घृतम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

भजेद्वातविकारोक्तं घृतं गुग्गुलुतिक्तकम् ।
राजयक्ष्मणि निर्दिष्टं मञ्जिष्ठादि च गुग्गुलुम् ॥

भगन्दरेप्येष, विशेषयुक्तः शेषानि तुष्यञ्जनसाधनानि ।
प्राणाधिकारात्परिशीलनाच्च सम्यग्विदित्वा पयितं विदध्यात् ॥

अश्वपृष्ठगमनं चलमव्य मद्यमैथुनमजीर्णमसात्म्यम् ।
साहसानि च विविधानि च रूढे वत्सरं परिहरेदधिकं वा ॥

कर्मविपाके :—

आचार्यभार्यागमने स्याद्भगन्दरवानिह ।
नवरत्नानि सौवर्णे रौप्येवाज्येन पूरिते ॥

नवग्रहाणां प्रीत्यर्थं पूजितान्यक्षतादिभिः ।
दद्याद्धोमं कृतवते अर्चिताय च मन्त्रवत् ॥

आदित्यादिग्रहाः सर्वे नवरत्नप्रदानतः ।
विनाशयन्तु मे ह्रष्टाः क्षिप्रमेव भगन्दरम् ॥२४०॥

सावित्रीजपमाज्येन होमं कृच्छ्रादिकं तथा ।
रत्नदानं च शंसन्ति भगन्दरनिबन्धनम् ॥

इति भगन्दरचिकित्सा

कफप्रधानाकुर्वन्ति मेदोमांसास्थिगा मलाः ।
वृत्तोन्नतं यं श्वयथुं सग्रन्थिग्रथनात्स्मृतः ॥

दोषासृङ्मांसमेदोस्थि शिरोव्रणभवा नवाः ।
सन्ध्यादोषास्त्रमेदोजास्तनुस्थूलकरा च सा ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

हानिवृद्धिरनिमित्ततोऽनिलादायतोसितरुगार्तितोदवान् ।
स्वस्थलात्प्रसरति स्थलान्तरं पाकतोच्छमासितं स्रवत्यसृक् ॥
पित्तेन पित्तारुणशीघ्रपाक दाहोस्रवत्युष्णमसृग्विपक्वः ।
शिरस्सवर्णोल्परुजः सकण्डूपूयं भवत्येष घनं कफेन ॥
दुष्टेऽसृजि भवेद्ग्रन्थिः शिरामांससमाश्रया ।
स्वापहा पित्तलाङ्गश्च जायन्ते जन्तवस्ततः ॥
मांसलैर्मार्जितं मांसमाहारग्रन्थिमावहन् ।
स्निग्धं महान्तं कठिनं शिरोनर्धं कषांकृतिम् ॥
मेदः प्रवृद्धमतिमेदुरतोनिलेन पित्ते पले त्वचि करोति बलासलिङ्गम् ।
ग्रन्थिं मृदुं च मलिनं घनमेव मेदः शीतं स्रवति देहविवृद्धवृद्धः ॥
भङ्गादस्थ्यभिघाताद्वाभ्युन्नतोऽपि नतोऽपि वा ।
ग्रन्थिः सञ्जायते सोऽयमस्थिग्रन्थिरिति स्मृता ॥
व्यायामादभिघाततोर्ध्वगमनात्तमस्य सद्यो जले
संवेशादनिलो निपीड्य च शिराः सास्रा भृशं शोषयेत् ।
ता वक्रीकुरुते ततो गतरुजो ग्रन्थी भवेन्निश्चलः
सोऽयं व्याधिरुदीरितः खलु शिराग्रन्थिस्तु याप्यो नृणाम् ॥२५०॥
रूढे व्रणे सर्वरसातिधाराद्वातोस्स्रुतं दुष्टमसृग्विशोष्य ।
कण्डूतितोदार्तियुतं करोति ग्रन्थिर्व्रणग्रन्थिरियं प्रदिष्टा ॥

चिकित्सा :—

ग्रन्थिष्वामेषु कर्तव्या यथास्वं शोफवत्क्रिया ।
हन्ता चित्रकमूलत्वक्सुधार्कपयसी गुडः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

भल्लातकास्थिकासीस लेपो भिन्द्याच्छिलामपि ।
बहिर्मार्गाश्रितं ग्रन्थिः किं पुनस्तत्र सम्भवम् ॥

दीर्घकालस्थितो ग्रन्थिरेभिर्भिन्द्योऽस्त्रभेषजैः ।
कार्यं मेदोभवेद्यैतत् तप्तैर्नालादिभिश्चतम् ॥

प्रमृज्यतैलदिग्धेन छिन्नद्विगुणवाससा ।
सुतप्तयाथवा दर्व्या बहुशो जतुलिप्तया ॥

शस्त्रेण पाटयित्वा वा दहेन्मेदसि चोद्धते ।
सेव्यः सोमः किंशुकसारेण लेपो ना........तु ॥

चर्मैकेनोपनाहः स्याद्रात्रौ पञ्चसुसमुत्थिते ।
कुष्ठं स्तन्येन सम्पिष्ट्य मेदोग्रन्थिपलायनम् ॥

वटस्थैः पल्लवैः सद्याः सेचनं च मुहुर्मुहुः ।
तैलेन चेङ्गुदीगुञ्जासिद्धेनाभ्यञ्जनं तथा ॥

नागलीकन्दलीकं च हयमाराङ्घ्रिनागरैः ।
लेपः स्नुहीरसं श्लक्ष्णैर्मेदोग्रन्थ्यर्बुदानिहृत् ॥

पुनर्नवार्काभयशिग्रुमूल करञ्जसिन्धूत्थमहौषधीनाम् ।
कल्कः प्रलिप्तः पशुमूत्रपिष्टो ग्रन्थ्यर्बुदं हन्त्यपचीं च सद्यः ॥२६०॥

शङ्खभस्मप्रलेपोऽयं ग्रन्थौ शस्तः सशर्करः ।
कुक्कुटकस्याश्च्योतस्य क्षारं वा तुम्बरस्य वा ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

गोघृतं गोशकृद्रस बहुशः कांस्यमर्दितम् ।
शङ्खचूर्णं सतैलंवा पच्यमानं विदारयेत् ॥२६२॥

सैन्धवपूरितजठरे दुत्तूरफलं विदाह्य मृल्लिप्तम् ।
अथ परिपिष्टं पयसा सर्वानुन्मीलयेत प्रन्थीन् ॥

शिरोग्रन्थौ नवे पेयं तैलं साहाचारं तथा ।
उपनाहानिलहरे वस्तिकर्मशिराव्यथः ॥

—इति ग्रन्थिचिकित्सा

गात्रप्रदेशे क्वचिदेव दोषास्समूर्छिताभ्यां समतिप्रदुष्य ।
वृत्तं मधु मन्दरुजं महान्तमनल्पमूलं चिरवृद्धिजातम् ॥

कुर्वन्ति मांसोच्छ्रयमत्यगाधं तदर्बुदं ग्रन्थिसमानलिङ्गम् ।
षोढां च मेदोमलमांसरक्तै........रक्तामिषजे विवर्ज्यः ॥

मांसाङ्कुरैश्चितं याति वृद्धिं वाशु स्रवेत्ततः ।
अजस्रं दुष्टरुधिरं पूरितं शोणितार्बुदम् ॥

चिकित्सा :—

अर्बुदे ग्रन्थिवद्वन्ति लाङ्गलीशिग्रुनागरम् ।
पूतीकवह्निवर्षाभूमूलं लवणपञ्चकम् ॥

सकणा मरिचं पिष्ट्वा गोमूत्रेण प्रलेपयेत् ।
सर्वार्बुदानि नश्यन्ति न रोहन्ति पूनर्नृणाम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सशेषदोषाणि हि योऽर्बुदानि करोति तस्याशु पुनर्भवन्ति ।
तस्मादशेषोद्धरणं प्रशस्तं क्षारेण शस्त्रेण तथाग्निना वा ॥२७०॥

—इत्यर्बुदाचीकत्सा

श्लेष्मोत्तरारक्तपलाश्रितामलाः पादेत्वधः कायमुपाश्रिताः शनैः ।
कुर्वन्ति शोफं घनगात्रश्लीपदं तत्कर्णनासादिषु पादवद्भवेत् ॥

रूक्षासिताकेस्निकरुक्समीरात् पित्तात्सदाहज्वरपीतवर्णम् ।
कफाद्गुरुस्निग्धपलाङ्कुराढ्यां त्यजेत्प्रवत्तत्परिवत्सरं वा ॥

श्लीपदेऽनिलजे विन्ध्येत्स्निग्धस्विन्नोपनाहिते ।
शिरामुपरि गुल्फस्य द्व्यङ्गुले पाटयेच्च तम् ॥

मासमेरण्डजं तैलं गोमूत्रेण समन्वितम् ।
जीर्णजीर्णान्नमश्नीयाच्छुण्ठीशृतिपणेन्वितम् ॥

त्रिवृतं वा पिबेदेवमशान्तौ वह्निना दहेत् ।
गुल्फस्याधः शिरामोक्षः पैत्ते सर्वं च पित्तजित् ॥

शिरामं.................. कफजे शीलयेद्यवान् ।
सक्षौद्राणि कषायाणि वर्धमानास्तथाभयाः ॥

यवामृताकूलकशृङ्गबेर सुरद्रुमारिष्टसमुद्भवारिः ।
वरारजोयुक्तमिदं च शीतं शोफापची श्लीपदमाशु हन्ति ॥

देवदारोर्गुडूच्या वा शुण्ठ्या वा क्षौद्रसंयुतः ।
क्वाथः पानाय लेपाय सिद्धार्थः श्लीपदे हितः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पिबेत्सर्षपतैलं वा गोमूत्रेण हरीतकीम् ।
गोमूत्रेण विपक्वं वा क्वाथं शार्करकत्वचा ॥

सर्षपविजयानागर हिङ्गुवचाशिग्रुरविमूलैः ।
दिनकरपयसापिष्टैः श्लीपदनाशाय लेपनं कुर्यात् ॥२८०॥

दिनकरमूलं पिष्ट्वा दिनकरपयसा प्रलेपयेदथवा ।
नागरसर्षपलशुनं श्लीपदनाशाय हिङ्गुना प्रयुतम् ॥

लेपैस्त्वैरण्डनिर्गुण्डीवर्षाभूशिग्रुसैन्धवैः ।
अथवा सर्षपस्नेहैः कुठेरमृगशृङ्गकैः ॥

उपोदकी सधान्याक पत्रालेपोपनाह्योः ।
प्रयुक्तया श्लीपदं हन्यादर्बुदं चापि मर्मजम् ॥

इति श्लीपदचिकित्सा

अनुगुल्फयन्तरं प्राप्तं शार्दूलं नाम श्लीपदम् ।
पुरस्थगुरुशार्दूलं तपयंसान्निपातिकम् ॥

ऊर्ध्वाधः शोधनं तत्र रक्तमोक्षं जलौकसा ।
ऊरुमूले शिरावेधं कुर्यात्क्षाराग्निकर्म च ॥

मेदस्था गलकक्षवंक्षणतले मन्यादशोः कर्णयोः
वार्ताकामलकोपमांश्च कठिनान् गण्डान्सकण्डूमलान् ।
पच्यन्तेऽल्परुजःस्रवन्ति नितरामुष्यन्ति नश्यन्त्यलं
पूर्वे वक्षयवृद्धिभागगति (?) नृणां सा गण्डमालापची ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तां त्यजेत्सज्वरच्छर्दीं पार्श्वरुक्कासपीनसम् ।
ऊर्ध्वाधः शोधनं पेयादपच्यां साधितं घृतम् ॥

दन्ती द्रवन्ती त्रिवृता जालिनी देववारिभिः ।
साधयेत समेदोघ्नं धूमगण्डूषनावनम् ॥

शिरयोपहरेद्रक्तं पिबे....त्रेण कार्ष्ण्यजम् ।
ग्रन्थीनपक्वानालिम्पेन्नाकुलीपटुनागरैः ॥

स्विन्नान् लवणपोट्टल्या कठिनाननुमर्दयेत् ।
शमीमूलकशिग्रूणां बीजैः सयवसर्षपैः ॥२९०॥

लेपः पिष्टेऽम्लतक्रेण ग्रन्थिर्गण्डपलायनः ।
पाकोन्मुखां स्रुतां सम्यक्पित्तश्लेष्महरैर्जयेत् ॥

अपक्वानेवमुद्धृत्य क्षाराग्निभ्यामुपाचरेत् ।
तैलं लाङ्गलिके कन्द कल्कपादं चतुर्गुणे ॥

निर्गुण्डीस्वरसे पक्वं नस्याद्यैरपचिप्रणुत् ।
गोऽजाव्यश्वखुरा दग्ध्वा पटुतैलेन लेपयेत् ॥

मूलैःसहाचरकुरूटकपीलुकन्या-
स्वस्वर्चिकाच सपट्टत्तमदारुलोध्रैः ।
भल्लातकाग्न्यभययष्टिसिताह्वदन्ती
....लाजाटत्रिकटुवेल्लकनग्नजिद्भिः ॥

पिष्टैः शाकोटकक्वाथैः कटुतैलं विपाचितम् ।
सक्षीरं नस्यलेपाभ्यां गलगण्डापचिप्रणुत् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तण्डुलीयकनिर्गुण्डी तिक्तालाबुदलद्रवैः ।
चुच्छुन्दरीमांसरसे सहतण्डुलवारिणा ॥

शम्याकमूलत्रिकटु कल्कं तैलं विपाचितम् ।
शमयेन्नस्यलेपाभ्यामपचीश्लीपदादिकम् ॥

स्नुह्यर्कदुग्धपिष्टं नागरपट्टेम्लिकाङ्घ्रिबकुलास्थि ।
अथवा कुक्कुटविष्ठामपचीषु विलेपयेत्तद्वत् ॥

पूतीकलुङ्गौषधसिन्दुवार रसोघ्न........र्कसिन्धु ।
लिप्तं स्नुहीपल्लववारिपिष्टं शीघ्रं निहन्याद्गलगण्डमालाः ॥

वारणार्तगलागन्धवाजिगन्धासुरद्रुमैः ।
जीमूतरससम्पिष्टैर्लेपः स्यादपचिप्रणुत् ॥३००॥

तक्राम्रशणशिग्रूमायवसर्षपमूलकैः ।
गण्डमालार्बुदग्रन्थि गण्डभेदीप्रलेपनम् ॥

निम्बत्वग्वृषबृहतीरात्र्यमृताकूलकोत्तमापिष्टैः ।
क्वाथः प्रगे निपीतः समधुपुरोगण्डमालाघ्नः ॥

पाययेद.... भारिष्टं गण्डाराारिष्टमेव वा ।
पिप्पलीवर्धमानं वा गण्डमालासु योजयेत् ॥

पाययेत रसं गुञ्जा प्रातस्तैलेन लेपयेत् ।
इत्यशान्तौ गदस्यास्य पार्श्वमूलसमाश्रितम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वस्तेरूर्ध्वमधस्ताद्वा मेदो धृत्वाग्निना दहेत् ।

॥

पार्ष्णि द्वादशचाङ्गुलीनि मुत्कैन्द्रवस्तिं च गदान्यवाश्चेत् ।
विदार्थमत्स्याण्डनिभानिमध्या बोधानिकर्मैरिति सुश्रुतोक्तेः ॥ (?)

आगुफकर्णः ....मितस्य जन्तो स्तस्याक्षनाग्रंबुलकान्विमुच्ये ।
घोणार्णवेदः सुरसा जवस्ते भित्त्वाक्षमात्राददते वपन्ति ॥

ऊर्ध्वं वा मणिबन्धस्य कुर्याद्रेखत्रयं भिषक् ।
अङ्गुलान्तरितं सम्यगपचीनां निवृत्तये ॥

स्निग्धोऽसवर्णां ग्रन्थिं तां नीरुजां मुद्गसन्निभाम् ।
पिटकां कफवातोत्थां बालानामजगल्लिका ॥

मांसस्थापनवंक्षुण्णोपि च यवप्रख्येहसांद्रालभिः
प्रोक्ताकच्छपसन्निभाः श्वयथवः षट्पञ्च वा कच्छपी ।
कर्णस्योपरि चाभितः पनसिका शाल्लकवत्रीव्ररुक्
पल्वार्तौ हनुसन्धिगास्थिरतरः शोफः शिला गर्दभः ॥३१०॥

मेदुराः पिटका यूनां मुखेषु मुखदूषिकाः ।
कण्टका इव पद्मस्थाः देहस्थाः पद्मकण्टकाः ॥
स्याद्वृत्ता विवृताककाच पित्तात्सदाहज्वरा
विद्यात्वम्बुजकर्णिकेव पिटका स्याद्वातपित्तोद्भवा ।
चक्राभा पिटका चितातिविवृता स्तनारुणा गर्दभी
कक्ष्याकक्षभुवोणवश्च महती सैकारुगन्धाह्वया ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मर्मस्वेदपरीतेङ्ग पिटकाः सरुजो घनाः ।
राजिकावर्णसंस्थान प्रमाणा राजिकाह्वयाः ।।

पित्तोल्बणैर्योऽच्छ्रि वीसर्पणमतैः शोफात्रिपाकच्छपजालगर्दभः ।
स्फोटस्तकक्षास्विह मांसधारणा दीप्तादिवर्णज्वरिणोग्निरोहिणी ।।

त्रिलिङ्गापिटकाद्वृत्तं ....म्रार्धगिरिमल्लिका ।
विदारीकन्दकठिना विदारीकक्षपंक्षणे ।।

ग्रन्थैशिरामांसगतेन मेदसा भिन्नस्य मध्वाज्यवशानितः स्रुतेः ।
वातेन मांसं किल शर्करायते तत्पूतिसारप्रतिशर्करार्बुदः ।।

जत्रूर्ध्वसन्धिकरपादतलेषु दोषै र्वल्मीकवच्च शनकैरुपचीयमानः ।
ग्रन्थिः सुबह्वणुमुखः सविदाहभूतो वल्मीक इत्यभिहितस्च्युतिकण्डुयुक्तः ।।

शर्करोन्मथिते पादे क्षते वा कण्टकादिभिः ।
ग्रन्थिः कोकिलवद्रुत्सन्नो जायते कदरं तु तत् ।।

वेगसंहरणाद्वायोर्गुदं सङ्कोचयत्यधः ।
निर्गति.... मलं कृच्छ्रादुपरुद्धगुदः स्मृतः ।।

पक्वं नखामिषं वातपित्तमपनखः सकृत ।
कृष्णाभिघातरूक्षश्च खरश्च कुनखो नखः ।।३२०।।

यक्षकर्दमसङ्काशकण्डूक्लेदान्वितान्तराः ।
अङ्गुल्यो समित्याहुरपरे कर्दमं व्रणम् ।।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

त्वचालकृष्णतिलकास्तु निर्वेदनालधमशास्त्रतदुन्नता स्युः ।
कृष्णासितास्तदधिकाः किल चर्मकीला
ताद्दग्विधो जतुमणिस्सहजोरुणः स्यात् ॥

कृष्णं सितं वा सहजं मण्डलं लाञ्छनं समम् ।
मुखे तु श्यामलं व्यङ्गं वक्त्रादेन्यत्वनीलिका ॥

व्यङ्ग्यं श्यावं चलात्पित्तान्नीलं तादृक्प्रभं चलम् ।
रक्ताद्रक्तान्तमाताम्रं श्वेतांतं कण्डुमत्कफात् ॥

श्लेष्मणा पायुशुष्केण त्ववपाण्डुरविचेतना ।
अल्पकण्डूरविक्लेदसाप्रसुप्तिरसुप्तितः ॥

पात्ताहारकफैरसाधुवमनोद्वीर्णैर्वृतैर्मण्डला
कण्डूरोन्नतलोहिताः स्मृत....तो कण्ठोनुबन्धी पुनः ।
कोठः शीतजलानलव्यतिकराच्छीते परव्या यथा
दंशेन श्वयथूनुदर्दुमपते तच्छीतपित्तं विदुः ॥

व्यम्लात्पित्ताच्छिरोर्त्कि ज्वलितमिवत्रपुः कोष्ठहृत्कण्ठदाहः
स्वेदो मूर्च्छा पिपासा कफसहितवमीश्चापि शेषे रसस्य ।
नानावर्णस्य तस्मिन्जठरमुपगते साम्लपित्तस्य वान्ति-
स्तिक्ताम्लोद्गारकण्डूबहुविधपिटकामण्डलानम्लपित्ते ॥

सानिलं सानिलकफं सकफं तच्च लक्षयेत् ।
दोषलिङ्गेन तत्साध्यं नवं याप्यं चिरन्तनम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मसूरवर्णाकृतयोखिलाङ्गे मुखस्य चान्तः पिटकामसूर्यः ।
दोषैः पृथग्भिस्त्रियुतैस्तथास्रा द्विरद्रुमाणामपि पुष्पगन्धात् ॥

गिरास्यशोषाङ्गविमर्दसन्धी विश्लेषणारोचकरोमहर्षः ।
शिरोर्तिनेत्रामयपीनसाश्च पूर्वाणि रूपाणि मसूरिकायाः ॥२३०॥

पिपासामस्तकरुजो पर्वभेदज्वरप्रदाः ।
अनस्थितस्यपाकस्थाः सुप्ताश्यावारुणाश्चलात् ॥

ज्वरमूर्च्छामदस्रात्र तृष्णावीसर्पसंयुताः ।
सदाहाः शीघ्रपाकिन्यो बिस्राः पीतश्च पित्ततः ॥

पाण्डुराः स्निग्धकठिनाः छर्दिजाड्यारुचिप्रदाः ।
अपाकाश्चिरपाका वा वेदनारहिता कफात् ॥

पित्तानिलात्सरुवकण्डू प्रलापारत्यरोचकाः ।
कण्डूलास्तिमिरागुर्व्यः सरुजः कफमारुतात् ॥

कलायस्र.... द्दग्गाथाः क्लेदवाहा व्रणान्विताः ।
शाखापवस्तिभेदिन्यः सज्वराः श्लेष्मपित्ततः ॥

रुग्दाहशोफरागाढ्याः छर्दिमूर्च्छाप्रलापदाः ।
कठिनाः पाकरहिताः निम्नमध्याश्च सर्वजाः ॥

गुञ्जा सवर्णः कृष्णो वा शोणितात्पित्तलक्षणैः ।
गन्धेन विषपुष्पाणां जाता निचयलक्षणाः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

साध्यास्त्वेकमलाः कृच्छ्राः द्वन्द्वजारुकजाः स्मृताः ।
असाध्याः सन्निपातोत्थाः जाताश्च विस्रगन्धकः ॥

प्रवालगुलिकाभासा यस्यगात्रे मसूरिकाः ।
उत्पाद्याशु विनश्यन्ति न चिरात्सविनश्यति ॥

विदाहकम्पाविरुजोतिसारैः हिक्का पिपासारुचिकासमोहैः ।
युता निहन्त्याशु मसूरिकान्ता मुखोरबाह्ये कणसन्निभास्तन् ॥३४०॥

वातेनोपरिपाकशुक्लविरलास्तुल्यास्तथाकोद्रवैः
पित्तासर्षपसन्निभास्तु पिटकारुग्दाहवातान्विता....: ।
कंगूलण्डुलसन्निभाकृतिरुचो वीसर्पवन्त्यः कफात्
नाम्ना मत्स्यरसा ज्वरातिसरणाप्रायामसूराः स्मृताः ॥

पित्तास्रकोपादहनादिवाग्नि र्जाता शरीरे सकले कचिद्वा ।
सदाहकण्डूज्वरगा.... स्फोटा मसूस्समशर्मलिङ्गाः ॥

मसूरविरलाः प्रख्यास्तथा गोस्तनसन्निभाः ।
अन्तर्वक्त्राः किणाभाश्च शारीरं नाशयन्ति ते ॥

उक्तास्पृष्टितपादोङ्घ्रि यत्वचः परिपाटनम् ।
अपकण्ठकभेदाद्याः द्वादशानर्थसंज्ञिकाः ॥

शाखासु श्वयथोर्तिसर्वसहिता दोषोष्मभिन्नामिष-
त्वग्जाता सरेल्लतेव शनकैः स्नावायतं तन्तुवत् ।
शाछ्नं कुरुते रुजः समथितैर्बद्धं पतेत्सक्तुभिः
शोफः शाम्यति चान्यतः पुनरयं स्नायुप्रवृद्धामयः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तीव्रार्तिरोगश्वयथु ....ल्या क्व तर्मघोरः ।
अयनानिरोधात्कुरुते कृच्छ्रासनं विलालिका नामा चिकित्सा ॥

विस्रावयेज्जलूकाभिरपक्वामजगल्लिकाम् ।
स्वरसे नक्तपत्रस्य पुष्पाश्वत्थस्य वाघृतम् ॥

सक्षीरमधुकं सिद्धं तैलं वापि प्रलेपयेत् ।
दारुकुष्ठमनोह्वैलैर्लिम्पेत्पाषाणगर्दभाः ॥

विधेस्तां सारयेत्पक्वां ····वक्षाजगल्लिकात ।
लोध्रकुस्तम्बरवचा प्रलेपो मुखदूषिते ॥

वटपल्लवयुक्ता वा नालिकेरोत्थशुक्तयः ।
अशान्तौ वमनं तस्य ललाटे च शिरोव्यधः ॥२५०॥

निम्बाम्बुपातो निम्बुम्बुसाधितं पद्मकण्टके ।
पिबेत्क्षौद्रान्वितं सर्पि र्निम्बारग्वथलेपतः ॥

विसृज्याभ्यन्तरालांतां चिकित्सेद्गिरिमल्लिकाः ।
पित्तवीसर्पवत्तद्वत्प्रत्याख्यायांग्निरोहिणीम् ॥

धात्रीप्रणेगोलेपश्च शाततोजालगर्दभे ।
विदारीनां ह्वते रक्ते श्लेष्मग्रन्थिवदाचरेत् ॥

मेधार्बुदक्रियां कुर्यात्सुतरां शर्करार्बुदे । १
प्रवृद्धं तु....छिद्रं सशोफं मर्माणि स्थितम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वल्मीकं हस्तपादे च वर्जयेदितरत्पुनः ।
शुद्धत्यास्रे घृते लिम्पेत् ....वहेदेवतामृतैः ।

श्यामाकुलत्थिकामूलदन्तीफलवसवतुभिः ।
पक्वे तु दुष्टमांसानि गतिः सर्वास्थि शोधयेत् ॥

शस्त्रेण सम्यगनु च क्षारेण च जलेन वा ।
शस्त्रेणोत्कृत्य निःशेषं न....मानकरं दहेत् ॥

निरुद्धमणिवत्कार्यं मृजवायुचिकित्सितम् ।
बिल्वं शुध्द्यजितोष्माणं द्व्यङ्गुले क्षिप्रमर्मणः ॥

हृतरक्ते शिरोवेधाच्छस्त्रेण परिवर्तयेत् ।
अभ्यज्य चक्रतैलेन सर्जचूर्णावचूर्णितम् ॥

बन्धयेद्व्रणमेवं वा पाशक्यं वह्निना दहेत ।
ततोऽग्निपिष्टः कुनटी तोजोवति रसाञ्जनैः ॥ ३६० ॥

रोचनासहितैः शुद्धमथ तैलेन नापयेत् ।
साधिते नागरनिशा कालेयकरसाञ्जनैः ॥

मधुरैरौषधै र्वायुं कुनखेऽपि क्रियाक्रमः ।
गोमूत्रं सैन्धवोपेतं वाशांसघृततैलकम् ॥

।

नाशनं नखरोगाणां सुखोष्णमवगाहनात् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तालकं तण्डुलीयस्य मूलं च पुटपाचितम् ।
तिन्त्रिणीकरसोपेतं तैलं वा नखरोगनुत् ।।

वटक्षीरं मधूच्छिष्टं विशालाक्षनखामयैः ।
पारावतस्य शकृता तुष्यते परिलेपनम् ।।

समवेतनवा पथ्या लाक्षामदनसैन्धवैः ।
घृततैलेन तैलेन सततं केवलेन वा ।।

व्रणपूतीपूयजुष्टं नखविवरं मंक्षु रोपयत्यभयात ।
नानाविधैरेतै रास्फोटनारत्रिकुरूटकक्षीरैः ।।

कर्दमव्रणनाशाय धान्याम्लेनावसेचयेत् ।
तिन्त्रिणीकफलं दग्ध्वा कोष्णमालेपयेद्व्रणम् ।।

शोधनार्थं त्रिकल्कं वा तैलेन परिशोधयेत् ।
नालिकेरस्य कोष्णेन वहन्तु तिलकाल्कात ।।

मशांश्च सूर्यकान्तेन क्षारेण यदि वाग्निना ।
तद्वदुत्कृष्टशस्त्रेण चर्मकीलाजतूमणी ।।३७०।।

लाञ्छनादित्रयं कुर्याद्यावासन्निशिराव्यथम् ।
लेपयेत्क्षीरपिष्टैश्च क्षीरवृक्षत्वगङ्कुरैः ।।

व्यङ्गेषु चार्जुनत्वग्वा मञ्जिष्ठा वा समक्षिका ।
लेपः सनवनीता वा श्वेताश्वखुरजामषी ।।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

रक्तचन्दनमाञ्जिष्ठा कुष्ठलोध्रप्रियङ्गवः ।
वटाङ्कुरा मसूरांश्च व्यङ्गघ्नमुखकान्तिदाः ॥

द्वेजीरके कृष्णतिलाः सर्षपाः पयसा सह ।
पिष्टः कुर्वन्ति वस्त्वंदु मुखस्थव्यङ्गलाञ्छनम् ॥

क्षीरपिष्ठा धृतक्षौद्रयुक्ता वा भृशनिस्तुषैः ।
मसूराः क्षीरपिष्ठा वा तीक्ष्णाः शाल्मलिकण्टकाः ॥

सगुडः कोलमज्जावा शशाप्रक्षौ (?) प्रकाल्पितः ।
सप्ताहान्मातुलुङ्गस्थं कुष्ठं वा मधुनान्वितम् ॥

पिष्ट्वा वा छागपयसा सक्षौद्रा शाल्मलीजटा ।
गारास्थिमुसलीकन्द युक्त वा साज्यमाक्षिकम् ॥

अन्वाम्रपल्लवा मस्तु द्वे हरिद्रे नवो गुडः ।
लेपःसवर्णकृत्पिष्टं स्वरसेन च तिन्दुकम् ॥

यवाः सर्जरसं लोध्रमुशीरं मदनं मधु ।
घृतं गुर्ड च गोमूत्रे पचेदादर्विलेपनात् ॥

तदभ्यङ्गान्निहन्त्याशु नीलिकाव्यङ्गमाषिकाः ।
मुखं करोति पद्माभं पादौ पद्मदलोपमौ ॥ ३८० ॥

मार्कवस्य रसक्षीर तोयपानानि........ ।
व्यङ्गे विशेषतो रक्तस्रावपूर्वं विलेपनम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पार्थस्य परिपांटेया दाडिमस्य त्वचार्द्रया ।
अजाक्षीरेण तेनैव धात्र्यामूत्रस्तथैव वा ॥

जम्बीरबीजं सगुडं क्षौद्रव्यङ्गे विलेपयेत् ।
कुङ्कुमोशीरकालेय लाक्षायष्ट्याह्वचन्दनम् ॥

न्यग्रोधपादांस्तरुणान् पद्मकं पद्मकेसरम् ।
सनीलोत्पलमञ्जिष्ठं पालिकं सलिलाढके ॥

पक्त्वा पादावशेषेण तेन पिष्टैश्च कार्षिकैः ।
लाक्षापत्तुङ्गमञ्जिष्ठा यष्टीमधुककुङ्कुमैः ॥

अजाक्षीरद्विगुणितं तैलस्य कुडवं पचेत् ।
नीलिकापलितव्यङ्गवलीतिल माषकाः ॥

हन्ति तस्तस्यमभ्यक्तं मुखोपचयवर्णकृत् ।
प्रसुप्तां वातकुष्ठोक्तं कुर्याद्दाहं च वह्निना ॥

उत्कोठे कफपित्तोक्तं कोठे सर्वं च कोष्ठिकम् ।
अभ्यज्य कटुतैलेन स्विन्नः सोष्णाम्बुसेचनात् ॥

पटोलनिम्बक्वाथेन वमनं रेचनं पुनः ।
पिप्पली गुग्गुलुमता कषायेण पलत्रयात् ॥

मधुना त्रिफलां लिह्यान्निम्बामलकसंयुताम् ।
अमृतात्किलसम्भूतमभयां विद्धि काश्यप । ॥३९०॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

तस्मात्तस्य फलं विप्र ! सर्वदोषहरं विदुः ।
बिन्दवः पतिताः सप्त शक्रस्य पिबतोऽमृतम् ॥

मनुष्याणां हितार्थाय ततो जाता हरीतकी ।
विजया रोहिणी चैव पूतना चामृता तथा ॥

जीवन्ती चेतकी चैव अभया चेति सप्तधा ।
अलाबुकण्ठी विजया चतुरङ्गीतु रोहिणी ॥

शक्रत्वक्पृथुनामा च मांसला चामृता मता ।
सुवर्णवर्णा जीवन्ती पञ्चाङ्गी त्रिवृतामता ॥

अभया कृष्णवर्णा च इत्येताः सप्त कीर्तिताः ।
॥

विजया वातरोगेषु रोहिणी सान्निपातिके ।
श्लेष्मिके पृथुनामा च पैत्तिके चामृता मता ।

अर्शांसि हन्ति जीवन्ती त्रिवृता व्रणरोपणी ।
अभया सर्वरोगेषु इत्येताः सप्तकीर्तिताः ॥

उन्मीलिनीबुद्धिबलेन्द्रियाणां निमीलनी पित्तकफानिलानाम् ।
प्रध्वंसिनी मूत्रशकृन्मलानां हरीतकी स्यादथ भुक्तकाले ॥

हरातकी मनुष्याणां मातेव हितकारिणी ।
कदाचित्कुप्यते माता नोदरस्था हरीतकी ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पथ्या ह्यतीन्द्रियबलानलदायिनी च लघ्वी सदा लवणवर्जितषड्रसा च।
दोषानलो मनकरी वयसि स्थिरत्वं मेधां करोति निखिलामयनाशनी च ॥

जीर्णाजीर्णविशङ्कायां भोजने समुपस्थिते ।
निर्विशङ्केन भोक्तव्य मन्ते खाद्या हरीतकी ॥४०१॥

कुष्ठगुल्ममुदावर्तं शोफपाण्ड्वामयं मदम् ।
अर्शांसि ग्रहणीदोषं पुराणं विषमज्वरम् ॥

हृद्रोगं च शिरोरोग मतीसारमरोचकम् ।
कासं प्रमेहमुन्मादं प्लीहाश्मसुदरोद्भवम् ॥

कफप्रसेकं वैस्वर्यं वैवर्ण्यं कामिलां क्रिमीन् ।
श्वयथुं तमकं छर्दिं क्लैब्यमङ्गारसाधनम् ॥

अस्मृतिं बुद्धिमोहं च जयेच्छीघ्रं हरीतकी ।
तान्रसांस्तानि कर्माणि विन्द्यादामलकीष्वपि ॥

यान्युक्तानि हरीतक्या वीर्यं तस्य विपर्ययः ।
श्वासकासहरं रुच्यं विपाके मधुरं रसम् ॥

केशानां रञ्जनकरं विभीतं चक्षुषोर्हितम् ।
हरीतकी द्विभागा च द्वादशामलकान्विता ॥

षड्भागाश्च विभीतक्यास्त्रिफलेयं प्रकीर्तिता ।
खादभानाय धान्याय मूर्ध्वरोगांश्च साधयेत् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वातश्लेष्मभवांश्चापि अग्निमान्द्यमरोचकम् ।
क्रिमिविष्टम्भशूलाश्च कर्षमात्रविभीतकम् ।।

धात्रीफलञ्चार्धकर्ष मत एतत्त्रयं समम् ।
पथ्या वा एकभागः स्याद्द्विगुणं तु विभीतकात् ।।४१०।।

विभीतकाद्द्विगुणितं किञ्चिद्धात्रीफलं विदुः ।
अभयैका योजनीया द्वावेव तु विभीतके ।।

धात्रीफलानि चत्वारि त्रिफलेयं प्रकीर्तिता ।।

कर्षद्वयान्विताः पथ्या ....कल्कमेव वा ।
खादिरेण कषायेण त्रिवृत्कुष्ठा सितोत्पला ।।

अमृता रजनी दुःस्पृक् वी....कनहिता स्रुता ।
प्राणदा प्राणदाप्रीण शीतपित्तविकारिणाम् ।।

ससैन्धवस ेष्ठेन सर्पिषाण्यङ्गशालिनः ।
तैलेन वा सशीतेन सुरसादिशृतेन वा ।।

खादिरं निम्बपत्राणि मसूरविदलैः सह ।
भृष्ट्वाज्येनाम्भसा पिष्टैर्लेपोऽयं शीतपित्तजित् ।।

अमृतापल्लवोशीर सर्षपैः श्लक्ष्णपेषितैः ।
क्षीरेणा ....नवा तद्वत् क्षीरशृङ्गाम्बुगैरिकैः ।।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

कुष्ठवल्मीकमृच्छाली तण्डुलोत्पलचन्दनैः ।
सपिण्याकैः प्रलेपःस्यादारनालाम्लपेषितैः ।।

आलेपनैस्तिलास्तीक्ष्णं सुरसागस्त्यपल्लवाः ।
कटुतैलेन सिद्धार्थ चक्रे मर्दनिशातिलाः ।।

धान्याम्लपिष्टाः पिण्याकसर्षपव्योषचित्रकाः ।
शताह्वा रजनी दारु धूमो मृद्भिः समन्वितः ।।४२०।।

अभ्यङ्गाय प्रदातव्यं तैलं सक्षारसैन्धवम् ।
एलादिगणसिद्धं वा तैलमास्तरणं चरेत् ।।

शय्यायां निम्बपत्राणि भस्मनो धूलितं तनोः ।
यथा शेत्रं कुलत्थस्य तित्तिरेर्मूलकार्द्रकम् ।।

पानान्नं शीतमुष्णं वा शीतपित्तेषु योजयेत् ।
विसर्पे वाम्लपित्ते च .... यदुक्तं त....र्जयेत् ।।

अथाम्लपित्तचिकित्सा:—

ऊर्ध्वाम्लपित्ते वमनं विरेचनमधोगते ।
सर्वत्रान्वासनं पश्चान्निर्यूहांश्च प्रयोजयेत् ।।

कफपित्तप्रशमनं यच्च पानान्नभेषजम् ।
आरग्वधामयाकुष्ठ खदिरैर्वा....साधितम् ।।

छिन्ना खदिरयष्ट्याह्व दार्वम्भो वा मधुप्लुतम् ।
वाशाधात्रियवानां वा कषायं पत्रिजातकम् ।।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शारिबामलकाम्भोद यवपिप्पलिपर्पटैः ।
सभृङ्गपत्रैः ससिता मधु वाताम्लपित्तजित् ॥

पटोलनिम्बकटुक गुडूचीनां जयेज्जलम् ।
आम्लपित्तज्वरच्छर्दि दाहशूलभ्रमा रुचिः ॥

पटोलनिम्बात्रिफला वाशाघनशृतैर्जलैः ।
गुग्गुलुः सेवितो हन्या दम्लपित्तं कफोल्बणम् ॥

द्राक्षाभयागुडक्षौद्र भृष्टं वा निम्बपल्लवम् ।
खादेद्गुडकणापथ्या मोदकं बहुवृद्धिकृत् ॥४३०॥

ततोंशो मोदकं निम्बात्पञ्चघ्नौ वृद्धिदारुकात् ।
यवसक्तोर्दशसिता मधुशीताम्बुसेविताः ॥

शमयन्ति क्षणाच्छूल मम्लपित्तसमुद्भवम् ।
सवाते च विबन्धे च प्राणदां तत्प्रयोजयेत् ॥

वासाघृतं तिक्तघृतं लिह्याद्वा मधुना कणाम् ।
पटोलपिप्पलीविश्वं धान्यजीरकसाधितम् ॥

अम्लपित्तारुचिहरं दीपनं मधुमद्घृतम् ।
खण्डामलककूश्माण्डं हितमत्रासृगन्वये ॥

धात्रीफलरसद्रोणे शर्करां तु तुलां घृतात् ।
चतुष्पलं च पक्त्वासिन् पृथगर्थपलं क्षिपेत् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वेल्लानलचतुर्जाति यष्टीसैन्धवजीरकम् ।
पलांशं विश्वमरिचं मृद्वीकायाश्चतुष्पलम् ।।

प्रस्थं कणास्त्रिवृतयः प्रस्थं पुष्परसस्य च ।
तत्खण्डामलकं नाम पाण्डुश्वयथुकामिलाः ।।

शिरोभ्रमाम्लपित्तार्श प्लीहदाहांश्च नाशयेत् ।
पीतत्वगस्थिकूश्माण्ड तुलां स्विन्नां पुनःपचेत् ।।

प्रस्थांशं शर्करा धात्री कूश्माण्डरससर्पिषी ।
निक्षिपेत्क्षौद्रवर्णेस्मिन्कणा नागरजीरकम् ।।

प्रसृतांशं पलं तीक्ष्णान् मुस्तातालीसधान्यतः ।
चतुर्जातं च कर्षांश मर्धप्रस्थं च माक्षिकात् ।।४४०।।

हन्त्येतत्खण्डकूश्माण्ड मम्लपित्तमरोचकम् ।
श्वासकासमसृग्पित्तं मूर्च्छा शीलं च पंतिजम् ।।

खण्डप्रस्थं कणाचूर्णं कुलुत्थं षट्पलं घृतम् ।
शतावरीरसस्याष्टौ क्षीरसार्धाढके पचेत् ।।

तत्रामलकधान्याक चातुर्जातिकनागरम् ।
अभयामरिचाम्भोद वांशीखदिरजीरकम् ।।

निष्कांशं त्रिपलं द्राक्षात् क्षिपेत्सा खण्डपिप्पली ।
दीपनी छर्दिहृल्लास तृष्णारुच्यम्लपित्तजित् ।।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

पक्वं शतावरीकल्कं सर्पिः क्षीरे चतुर्गुणम् ।
श्वाससन्तापतृण्मूर्च्छा रक्तपित्ताम्लपित्तजित् ॥

मसूरिकाचिकित्साः—

मसूरिकाग्ररूपेषु लङ्घनं वमनं ततः ।
यष्टीमधुकनिम्बत्वगम्बुभिस्त्रितयासु च ॥

विरेचनं त्रिवृच्चूर्णं युक्तया वा विपत्तिना ।
सिरां विध्वाथ रुधिरं दाहयुक्ति विमोहयेत् ॥

वातपित्तकघ्नं च यच्च स्फोटविसर्पजित् ।
कदलीकन्दनिम्बत्वग्रसश्च सकगाघृतः ॥

निम्बपल्लवचा कृष्णा शीतला साधितं जलम् ।
जलं च शारिबाद्युत्थं हिनस्त्याशु मसूरिकाम् ॥

वासामृतातरुनिशापिचुमन्दवल्क सिंहीफलत्रयपटोलमहौषधीनाम् ।
तोयं पिबेत्समधुगुग्गुलुवासिताभ्यो विस्फोटदाहपरिसर्पमसूरिकासु ॥४५०॥

कुस्तुम्बरुकणा विश्व प्राणदा बृहतीद्वयैः ।
साधितं........मत्पादो विधुनोति मसूरिकाः ॥

जीवन्ती त्रिफलापटोलरजनीवासामृताशारिबा
पाठानागरधन्वयासधनिको वा सक्तुनिम्बाम्बुदैः ।
सोशीराम्बुहिमैः स यष्टिमधुकैरेभिर्यथालाभतः
क्वाथः स्फोटमसूरिकाज्वरतृषाविसर्पसर्वापहः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शुण्ठीकणानिम्बपटोलमुस्ता धान्याककुष्ठत्रिफलाकषायः ।
सपिप्पलीकं सितया समेतः क्वाथो गुडूच्यामलकस्य वारि ॥

वरापयस्याम्बुदशीतशारिबा वृषामृतानिम्बपटोलवालुकैः ।
स विश्वसर्वैः सलिलं विपाचितं मसूरिकाघ्नं गुरुमाक्षिकाविलम् ॥

द्राक्षाममृतवल्लीं च तिक्तां च विपचेज्जले ।
पिबेन्मसूरिकार्तस्तु शीतं सगुडचन्दनम् ॥

जलधरधनिकाधात्री पिचुमन्दकुचन्दनक्वाथः ।
मधुमधुरामश्नाति सोमसूरिकास्फोटवीसर्पान् ॥

मसूरिकायां सति चातिसारे स्याद्धातकी बिल्ववटाम्लशृङ्गैः ।
ज्वरातिसारे शृतमम्बुपाठा दुस्पर्शशुण्ठीकुटजाह्ववालैः ॥

उदुम्बरफलग्रन्थिं पिबेत्सक्षीरचन्दनम् ।
यष्ट्याह्वं वाथ तैलेन रसं वा पनसाङ्घ्रिजम् ॥

धात्र्याः कुमार्या ब्रह्म्या वा चन्दनस्वरसेन वा ।
क्षारोदकेन वा धात्री गुञ्जोर्वारुफलं हिमम् ॥

नारिकेलस्य तोयेन चूर्णं त्रिकटुकस्य वा ।
बृहती निम्बमञ्जिष्ठा तिक्ता त्रायन्ति यष्टिभिः ॥१६०॥

पिबेत्पक्वेन रुद्राक्षं क्वाथेन मरिचस्य वा ।
हरिचन्दननिष्क्वाथः सिद्धं क्षीरं तथा हितम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मसूरिकाणां परितो ज्वालावद्भुदितं यदि ।
.... व्रह्मीरसः सेव्यः शर्करामधुरं वरम् ।।

बलया भीरुमुद्गाभ्यां स्थिरा बृहतिगोक्षुरैः ।
प्रपिबेत्साधितां पेयां मशू....निलादिभिः ॥

परिषेकाञ्जनालेपा हिताः पत्तिनिबर्हणाः ।
दुष्टासृजि विसर्पोक्तं दूर्वासर्पिः प्रसेचयेत् ॥

भस्मनोध्दूलयेदङ्गं पक्वाभिस्ताभिरर्दितम् ।
तेनैवाच्छादयेच्छय्यां तृणांश्चापि मसूरिकाः ॥

पुष्पाश्वत्थकुमारी दूर्वाक्षीरे द्रवे तैलम् ।
पादांशं परिपक्वं विस्फोटकमसूरिकाप्रणुल्लेपात् ॥

क्षीरीत्वक्स्वरसे तैलं सिद्धं स्वाङ्कुरवल्कवत् ।
आज्यं वाभ्यंज्य च स्नायाद्विंशतोर्दिवसात्परम् ॥

गजास्थिगैरिकानिशा चूर्णं माक्षिकसंयुतम् ।
आलेपनाद्व्रणं हन्यात्कबलं वा गजास्थिजम् ॥

अर्चनाचण्डिकादीनां शातकुम्भस्य पूजनात् ।
बलिभिर्जपहोमाभ्यां प्रणश्यन्ति मसूरिकाः ॥

आभिषिच्याम्बुभिः शीतै रनुलिप्य हिमेन च ।
प्रणम्य रक्ष रक्षेति प्रार्थनीयो महेश्वरः ॥४७०॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

दुःस्पर्शपाठातिविषाहविश्वैस्तथैव पाठाम्बुदनागरैर्वा ।
प्रसिद्धमम्भः सजलातिसारं निवर्तयेन्मत्स्यनसांसजूर्तिः ॥

....धाढकीकाथः सिद्धेन मिलितेन च ।
यूषैश्च धन्वमांसानां भोजनं तत्र शस्यते ॥

अहोरात्रायुषाधन्व तक्रं जातं सुसंस्कृतम् ।
विद्धे भेदे प्रयुञ्जीत यतयस्थं च लङ्घनम् ॥

ज्वरातीसारविद्रायः साकल्येनात्वपूजिताम् ।
विरेचनं प्राग्विस्फोटे त्रिवृता गुडयुक्तया ॥

गलजे कुबिम्बखदिर क्वाथोमुखपाकभैवज्यम् ।
पश्चात्सवर्णकिरणं कुरण्टतैलं च कुङ्कुमघृतं च ॥

रोचनात्रिफलाशेलु ....श्च्योतनमाक्षिकैः ।
मसूरिकान्विसर्पोक्त विधानं वोपचारयेत् ॥

लेपांश्चैरकानिर्यास घृते तुल्यस्तयैर्गुडैः ।
अर्कक्षीरात्पलार्धं च लेपः स्फोटतपादिजित् ॥

करञ्जबीजं रजनीकटुत्रयं समानभागं लवणस्य मृत्तिकाः ।
दध्ना समालोड्य घृतेन लेपयेत्पादौ तु पादस्फुटितं विनश्यति ॥

शुक्तिकाभस्मसिन्धूत्थ सर्पिः सर्जरसं पयः ।
पादयोः स्फोटलेपेन तिक्तालाबूफले स्थितः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अन्तर्धूमाविदग्ध स्नुक्काण्ड....रूचिकाविडक्षारम् ।
साजक्षीरं त्रिदिनं कटुतुम्बिस्थं स्फुटपदेषु हितः ॥४८०॥

पूरयेद्रविदुग्धेन विद्धें....त्कण्टकेन तु ।
उद्धृत्यतेऽनुध्दृते चास्मिन् डतं.... स्वयमेव तत् ॥

सैन्धवं तत्र संस्थाप्य दहेल्लोहशलाकया ।
ईषदुष्णेन बध्नीया त्कुमार्याश्च दलेन तु ॥

लवणोदकसेकं वा सं....नोदनबन्धनम् ।
तण्डुलीयकमूलाढ्य लवणं सपुनर्नवम् ॥

पुनर्नवं त्रासपटुच्छिल्लीं वा स्नेहसंयुताम् ।
चिञ्चाकरञ्जपत्रं वा घृतकाञ्जिकसंयुतम् ॥

घृष्टं प्रबन्धनं कुर्यात् पायसं कोरदूषजम् ।
व्रणक्रियां च कुर्वीत पक्के दुष्टे पुनर्दहेत् ॥

लिप्त्वा सर्षपकल्केन स्वेदं वा चाश्मना भृशम् ।
पादपार्ष्णिव्यथा तीव्रा पक्षार्धेन प्रणश्यति ॥

अगस्त्यपुष्पचूर्णेन माहिषं विपचेत्पयः ।
तदुत्थे नवनीताक्तो देहस्य स्फुटितं जयेत् ॥

अङ्गस्वेदे हरीतक्या सर्वाङ्गस्नेहमाचरेत् ।
शिरीषहेममलामज्ज लोध्रैश्चावर्तनं तथा ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

असकृद्देहदौर्गन्ध्ये लिम्पेच्चिञ्चादलद्वयम् ।
गोमूत्रेण समायुक्त मथवा माहिषं शकृत् ॥

दुर्गन्धे शिग्रुमूलाग्नि राजकौबेरसैन्धवैः ।
देहदुर्गन्धजित्सिद्धं तैलं चिञ्चादलद्रवे ॥४९०॥

चिञ्चानीलीवकुलतुलसीपत्रजम्बीरनीरे
यत्कुण्डल्या फलजलसुपिष्ट्वोषणांकोलकुष्ठैः ।
राजी.... पशुजलयुतं....कानां भवैर्वा
शैलाचेलाभ्यङ्गात्तैलमेहाशिरः कुष्ठदौर्गन्ध्यहारी ॥

तद्वत्पुग्पाम्बुशीताम्बु जोऽङ्गकोशीरलेपनम् ।
अपापूर्णं वि....धुनु पादवारसमायुतम् ॥

पाययेच्चामुखं भस्म राशौ विनिखनेच्च तम् ।
....र्णेबुपूर्णे हस्तेन मथित्वा तैलवारिणि ॥

क्षिपेदधोमुखं कर्णं हन्याद्वा चूर्ण्येत वा ।
....स्रोतोगर्तकर्णं पूरयेल्लवणाम्बुना ॥

शुक्तेन वा सुखोष्णेन हन्त्येकैव हरोविधिः ।
वैद्युतानलदग्धेऽङ्गे हितं तपनमग्निना ॥

क्षारेक्षुरसतैलाज्य तण्डुलाम्बुविनिश्चितैः ।
उ....प्रायेम्ललवणैः ....॥

स्वेददग्धे पुनः प्रायो मधुरस्निग्धशीतलैः ।
प्रमाददग्धनिर्दिष्टं चतुर्धातित्रशुद्धके ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

त्वग्विवर्णो मिते व्यर्थं न च ....मुद्भवम् ।
स्फोटदाहत्रिदोषं दुर्दग्धमति....हात् ॥

मांसलम्बनसङ्कोच दाहयावनवेदनाः ।
शिरा....दिना शस्त्रे ण्मूर्च्छा व्रणगाम्भीर्यमृत्यवः ॥

शुद्धस्याग्निर्हतधनं कार्यमुष्णं च भेषजम् ।
अभीक्ष्णं परिषेकोत्थ वसातैलगतैर्मुदा ॥५००॥

तत्राम्लपिष्ट्या गोष्ट्या लेपः............।
....र्दसितमुष्णं च युञ्ज्यावातौतलोहिमम् ॥

अतिदग्धे घृतं कुर्यात्सर्वं पित्तविसर्पनुत् ।
तक्राम्लं काञ्जिकाम्लं वा वङ्कमूत्रायुते पचेत् ॥

सिञ्चेत्तेन कदुष्णेन व्रणं दहनवाहदम् ।
आलिम्पेत्कुम्भतङ्कोलान् बदरीपत्रकल्कितान् ॥

मथितादारनालाम्लात्फेनं वापि समुध्दृतम् ।
नन्द्यावर्तस्य पत्रं वा नवनीतसमन्वितम् ॥

क्षीरेण गौलीमत्स्याक्षी शतधौतघृतेन वा ।
मधूच्छिष्टजपापुष्प वरापथ्यामषीयुतम् ॥

।

सिद्धं क्षीरे च तैच तैलमग्निदग्धव्रणापहम् ॥

नीलीमञ्जिष्ठायष्टिपुंड्राह्वहारिद्रा लाकालाक्षिलोध्द्रमधूच्छिष्टजपाभिः ।
सिद्धेनाज्येन क्षीरयुतेन अदग्धं लिम्पेत् मण्या वा भृष्टयवानां तिलतैलेन ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

मरिचखदिरतोयं कुङ्कु ठीकाकतिक्ता मधुकमदन....भवं दग्धपूगं........।
तिलजरजनिनिम्बपत्रनीरारसालैः कवलत्रिधिरपि स्याच्चूर्णदग्धव्रणघ्नः ॥

लक्षणं च चिकित्सा च सुदग्धे त्वग्निकर्मकृत् ।
स्नेहदग्धं भृशतरं रूक्षणं तत्र तु योजयेत ॥

स्नायु........ ....।
........व्यामये शस्तं विसर्पोक्तं भिषग्धितम् ॥५१०॥

विशोषादारनालेन मिश्रितां तिलपर्णिकाम् ।
सतक्रां वाजिगन्धां वा लिम्पेत्तैलं पिबेत्पुनः ॥

सर्षपद्वयसिन्धूत्थ लशुनालकगन्धकैः ।
गोमूत्रनिम्बनिर्गुण्डी धुत्तूरस्य रसे शृतम् ॥

सिन्दुवाररसे सर्पि र्गव्यं वाङ्कबलं त्र्यहम् ।
तैलाश्च कण्टतीक्ष्णाज्य बलामूत्रेण शल्यकम् ॥

विदारिकायां सञ्जात मात्रायां तु शिराव्यथः ।
ललाटे रक्तमोक्षश्च जलूकाभिरलाबुना ॥

नस्यं च व्योषसिन्धूत्थ नक्तमालदलद्रवैः ।
इत्युक्ताः पञ्चपञ्चाशत् क्षुद्ररोगा विभागशः ॥

मेढ्रं शोफं पञ्चधा सोपदंशो वातोत्थार्तिः पित्ततः सज्वरोष्मा ।
शीतः कण्डूश्लेष्मणा निस्रुतासृक् कुर्यात्सोऽयं मृत्यवे सन्निपातात् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अन्तर्बहिर्वा मेढ्रस्य कण्डूलामांसकीलकाः ।
पिच्छिलासस्रुतोर्मांसि निघ्नन्तिस्तमुपेक्षया ॥

अन्तर्बहिर्वा पिटकाकफास्रा मेढ्रस्य या सर्षपवर्णमानाः ।
ताः कीर्तिताः सषपिका विशीर्णा जीर्णासुमध्ये सरुजोऽत्र मन्दः ॥

कु....णारक्तपित्तोत्थ जाम्बवास्थिनिभायुजाः ।
अ........................माग्रमुद्गवत् ॥

स्फोटैः पुष्करिका व्याप्ता पुष्करस्येव कर्णिका ।
घृष्टे मेढ्रमवाणीभ्यां सम्मूढपिटका भवेत् ॥५२०॥

पित्तासृग्भ्यां त्वचः पाक स्त्यक्तकोज्वरदाहवान् ।
शूकमूत्रिकरक्तोत्थाः स्पर्शहानिस्तदाह्वया ॥

मर्दितं मृगितं मेढ्रं संरब्धं वायुकोपतः ।
विषमा काठिना भुग्ना वायुना ष्ठीविका स्मृतः ॥

चलेन दुष्टेन तु चर्ममेढ्रान् निवर्तते सार्ति च पाकिच क्वचित् ।
मणेरधः सङ्कुचितं शिलाघनं निवृत्तनं दचकदापि कण्डून् ॥

उत्थितं स्फुटितं चर्म निर्दिष्टमवपाटिका ।
लिङ्गं तु........कर्णं ग्रन्थिताख्यं कफोद्भवम् ॥

स्रोतोनिलेन कुपितं....रुणद्धि चर्म मूत्रं ततःस्रवति रुद्धमणिश्चधारम् ।
छिद्रेश्चितं प्रतनुभिः पवन....कोपात् स्यान्मेहनं मणिशत फोनकं तत् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सरागैरसितैः स्फोटैः पिटकाभिश्च पीडितम् ।
मेहनं वेदनातीव्रं तं विन्द्यादसृगर्बुदम् ॥

मांसगः सर्वजः सर्वं वेदनामांसशातनीः ।
मांसार्बुदं प्रागुदितं विद्रधिश्च त्रिदोषजम् ॥

कृष्णानि भूत्वा मांसानि विस्तीर्यन्ते न उन्नतः ।
पक्वानि सन्निपातेन तान् विन्द्यात्तिलकालकान् ॥

मांसोत्थमर्बुदं पाक विद्रधिं तिलकालकात् ।
चतुरो वर्जयेत्तेषां शेषान् शीघ्रमुपाचरेत् ॥

मेढ्रस्थितां शिरां विध्ये दुपदंशेन वोद्धते ।
शिरां कुर्यात्क्रियां शुद्धिं ....रक्तेण विशेषतः ॥५३०॥

तिलकल्कघृतक्षौद्रै र्लेपः पक्वे तु पाटिते ।
जम्ब्वाम्रसुमनोनीप श्वेतकाम्भोजकाङ्कुराः ॥

शाल्मलीबदरीबिल्व पलाशकनिशोद्भवाः ।
त्वचक्षीरीद्रुमाणां च त्रिफलां च पचेज्जले ॥

सक्वाथक्षालनं तेन पक्वं तैलं प्रलेपनम् ।
कपाले त्रिपलां दग्ध्वा सघृतारोपिणी वरम् ॥

तथैव श्वेतपालाश पल्लवं वोपसाधितम् ।
तैलं च नालिकेरस्य शलाटु फलवल्कजम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अ....रीपल्लवं भृङ्गं मूलं वा करवीरजम् ।
लिम्पेच्छीताम्भसाज्येन मषीं जम्बुकलण्डजाम् ॥

कुण्डलीपत्रनिर्यास माणिमन्थाशिलोद्भवः ।
ताम्रेण कांस्ये संघृष्टा व्रणघ्नी स्याद्रसक्रिया ॥

नारङ्कपालंङ्करवीरमूलं पूगीफलं वा कठिनं निघृष्टम् ।
लेपान्निहन्ति प्रसभं नराणा मप्युद्धतां साधनरोगपीडाम् ॥

दार्वीसुरसयष्ट्याह्व गृहधूमनिशान्वितम् ।
तैलमभ्यञ्जनाभ्यक्तं मेढ्रोगनिबर्हणम् ॥

सामान्यं साधनमिदं परिशेषं च शोफवत् ।
आमेफलेम्बुनास्वेदो बार्हतेन फलेन वा ॥

न च याति यथापाकं प्रयतेत तथा भृशम् ।
पक्वस्नायुशिरामांसैः प्रायो नश्यंति हि ध्वजः ॥५४०॥

अर्शसां भिन्नदग्धानां क्रिया कार्याय दर्शवत् ।
सर्षपालिखिता सूक्ष्मैः कषायैरवचूर्णयेत ॥

तैरेवाभ्यञ्जनं तैलं साधयेद्व्रणरोपणम् ।
क्रियेयमवमन्धेपि रक्तं स्राव्यं तथोभयोः ॥

कुम्भिकायां हरेद्रक्तं पक्वाणां शोधिते व्रणे ।
तिन्दुकात्रिफलालोध्रै र्लेपं तैलं च रोपणम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

अलज्यां स्रुतरक्तायां मयमेव क्रियाक्रमः ।
उत्तमाख्यां तु पिटकां सम्भिद्य बडिशोध्दृताम् ॥

कल्कैश्चूर्णैः कषायैश्च क्षौद्रयुक्तैरुपाचरेत् ।
क्रमः पित्तविसर्पोक्तः पुष्करिव्युत्थयोर्हितम् ॥

त्वक्पाके स्पर्शहन्यां च सेचयेन्मथितं वपुः ।
बलातैलेन कोष्णेन मधुरैश्चोपनाहयेत् ॥

अष्ठीलिकां हृते रक्ते श्लेष्मग्रन्थिवदाचरेत् ।
निवर्तसर्पिषाभ्यज्य स्वेदयित्वोपनाहयेत् ॥

त्रिरात्रं पञ्चरात्रं वा सन्नद्धैः शाद्वलादिभिः ।
स्वेदयित्वा ततो भूयः स्निग्धं चर्म समानयेत् ॥

मार्णि प्रपीड्य कनकैः प्रविष्टे चोपनाहनम् ।
मणौ पुनः पुनः स्निग्धं भोजनं चास्य शस्यते ॥

अथमेव प्रयोज्यः स्या दवपाट्यामतिक्रमः ।
ग्रथितं स्वेदितं नाह्यं स्निग्धोष्णैरुपनाहयेत् ॥५५०॥

नाडीमुभयतो धारां निरुद्धे जरुना सतीम् ।
स्नेहाक्तां स्रोतसीं न्यस्य सिञ्चेत्स्नेहैश्चलापहैः ॥

त्र्यहात्त्र्यहात्स्थूलतरा न्यस्य नाडीं च वर्धयेत् ।
स्रोतोद्वारमसिद्धौ वा धीमाञ्छस्त्रेण पाटयेत् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सीवनं वर्जनं युञ्ज्यात्सद्यः क्षतविधिं ततः ।
लिम्पेत्कषायैः सक्षौद्रै र्लिखित्वा शतदोनकम् ।

रक्तविद्रधिवत्कार्या चिकित्सा शोणितार्बुदे ।
व्रणोपचारं सर्वेषु यथावस्थं च योजयेत् ॥

क्रुद्धोनिलस्तम्भरवार्तिसुप्ति रक्तासितात्पार्तवनिस्स्रुतं च ।
कुर्याद्व्यथावंक्षणपार्श्वपादे स्यात्वारके व्याप्र उदीरितार्यः ॥

सैव स्मृताभिचरण शोफयुतातिव्यवायेन ।
रज्जुतापृष्ठोरुभवन् प्राक्पठणाद्दूषिते मरुता ॥

सोदावर्ता पीडिता मार्गरोधाद्योनिः कृच्छ्राद्बद्धफेनार्तवस्रुक् ।
सा जातघ्नीपत्त्रदुष्टार्तवस्थो जातं........मारुतो हन्त्यपत्यम् ॥

वातोल्लिन निपीडितो समगतेरत्यासितायारते
योनौ सास्थिफलं मुखं कुटिलतादन्तर्मुखीसास्ररुक् ।
मात्रासेवितवातलैः प्रकुपितो गर्भस्थितायां स्त्रियां
योनिर्वीरमणं करोति पवनः सूचीमुखीशोधिता ॥

वेगरोधाद्धतो वायु र्दुष्टो विण्मूत्रसंग्रहम् ।
करोति योनेः शोषं च शुक्लाख्या सातिवेदना ॥

षडहात्सप्तरात्राद्वा शुक्रं गर्भशयान्मरुत् ।
वमेत्सरुन्नीरुजा वा यस्यानूवामनी मता ॥५६०॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

....मोकातापरत्या.... स्त्रीगर्भे बीजशेषतः ।
न द्वेत्रिण्यस्तनी च स्यादण्डसंज्ञानुपक्रमा ॥

दुष्टानिलो योनिमुखं च गर्भं प्रविष्टिता कोष्ठवृतं करोति ।
स्रस्तं महायोनिमुदीर्णमांसं चावातकीत्रारिरुजप्रादिष्टा ॥

योन्याश्रितं पित्तमतिप्रवृद्धं करोति हं ज्वरन्यातिगन्धैः ॥

पीतं लिङ्गं व्यार्तवे मृष्णकृष्णं व्यापन्नता पित्तसमुत्थपानौ ।
शोकोपवासादतिमैथुनाच्च विदाहिभिश्चास्रमतीव दुष्टम् ॥

प्रवर्तते योन्यमवापकाले प्रसृग्दरोऽयं प्रदरोऽस्रयोनिः ॥

वातात्सशूलं रुधिरं पित्तान्नीलज्वरान्वितम् ।
कफाच्छीतं त्रिलिङ्गन्तु त्याज्यां मूर्च्छां ज्वरान्विताम् ॥

शुभ्रः शीतावस्तिमज्जापकर्षा योनिस्रावः शोषशूलप्रदो यः ।
सोऽस्थिस्रावश्लेष्मकीत्रातिवाहे तद्वर्णं वाद्यार्तवं यद्रसस्य ॥

क्रूराभ्यां वातपित्ताभ्यां यस्यां संक्षीयते रजः ।
सदाह कार्श्यवैवर्ण्यं सम्भवेल्लोहितक्षयात् ॥

उद्भारक्षुतिधारणां निधुवने योनिस्तु पित्ताग्निना
दुष्टाः शोफरुजावतीगुरुतरापीतासिता सृग्वहा ।
विड्भेदज्वरवंक्षणोदरकुटीरुक्पित्तलापिभृशं
प्रोक्तानेह परिप्लुतोतिजठरे वस्तो गुरुत्वावहः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वातः श्लेष्मामययाम्निश्वेति पिच्छिलवाहिनी ।
उपप्लुताविप्लुत्राति क्रिमिकण्डूरधावनात् ॥५७०॥

श्लेष्मासृङ्मूर्च्छिताद्वाता द्रजोमार्गनिरोधिनी ।
योनौ स्यात्कर्णिकायोनि कम्पोऽयं सैव कर्णिनी ॥

दोषैर्मांसं शोणितं च प्रपन्नैः छत्राकारा मासकीला भवन्ति ।
एकं तूलाः पिच्छिलाः स्त्रवतीता स्तेऽर्शांस्यालस्येन निघ्नन्ति योनिम् ॥

स शोणितैस्त्रिभिर्दोषै योनिगर्भाशयाश्रितैः ।
तथा स्वोपद्रवकरै र्व्याप्ताः स्यात्सान्निपातिकैः ॥

योनिव्याप्यस्तु भूयिष्ठं शंस्यते कं....तजित् ।
स्नेहनस्वेदवस्त्यादि वातहासत्रिशेषतः ॥

पाययेत बलातैलं मिश्रकं सुप्तमारकम् ।
स्निग्धां स्विन्नां यथायोनि दुःस्थितां स्थापयेत्समम् ॥

पाणिना नमयेज्जीवं संभृतां वर्धयेत्पुनः ।
प्रवेशयेन्निवृत्तां च विप्लुतां परिवर्तयेत् ॥

कर्मभिर्वमनाद्यैश्च मृदुभिर्योजयेत्स्वयम् ।
सर्वतः सुविशुद्धायाः शेषं क्रम विधीयतें ॥

वस्त्यभ्यङ्गपरीषेक प्रलेपपिष्टधारणम् ।
गुद्धची त्रिफलादन्ती क्वाथैश्च परिषेचनम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

बृहती नतदारुकुष्ठैः शृततैलं पिचुना धृतं च योनौ ।
वृषगोक्षुररास्नकैः प्रपीतं शृतदुग्धं च निहन्ति योनिशूलम् ॥

गुडूचीमालतीरास्ना बलामधुकचित्रकैः ।
सकण्टकारी देवाह्व कर्षांशैः साधुसाधुतः ॥५८०॥

तैलप्रस्थः सगोमूत्रः क्षीरेण द्विगुणेन च ।
असकृत्पिचुना योगौ प्रणीतः शूलनाशनः ॥

दर्भक्वाथं पिबेद्बिल्व मूलं वा मद्यकल्कितम् ।
क्षीरं गोक्षुरसिद्धं वा शर्करासहितं हितम् ॥

दारुविश्वघनोशीरैः सिद्धं क्षीरं सशर्करम् ।
एरण्डतैलं सक्षौद्रं योनिशूलनिवर्हणम् ॥

पित्तलानां तु योनीनां सेकाभ्यङ्गपिचुक्रियाः ।
शीताः पित्ताहिताः कार्या स्नेहनार्थं घृतानि च ॥

शतावरीमूलतुला चतुष्कां क्षुण्णपीडितात् ।
रसेन क्षीरतुल्येन साधयेद्घृतमाढकम् ॥

जीवनीयैः शतावर्या घृष्टिकाभिः परूषितैः ।
पिष्टैः प्रियालैश्चाक्षांशैर्द्विबलामधुकान्वितैः ॥

सिद्धं शीतेऽत्र मधुनः पिप्पल्याश्च पलाष्टकम् ।
शर्कराणां दशपलं क्षिपेल्लिप्येत्पिचुं ततः ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

योन्यसृक्शुक्रदोषघ्नं चव्यं पुंसवनं परम् ।
कामिलां वा तरु विसर्पं हृच्छिरोग्रहम् ।।

अपस्मारार्दितायाम समुन्मादांश्च नाशयेत् ।
एवमेव पयः सर्पिर्जीवनीयोपसाधितम् ।।

गर्भदं पित्तजातानां रोगाणां च भिषग्घितम् ।
रक्तक्षयाय क्षीरं च जीवनीयशृतं पिबेत् ।।५९०।।

वामिन्याप्लुतयोश्चैव स्वेदयित्वा प्रयोजयेत् ।
........स्नेहपिचुभिर्भोजनं चानिलापहम् ।।

सल्लकी ....जम्बु धात्रत्पक्वं च वल्कलैः ।
कत्रायैः साधितान् स्नेहान् पर्युतप्लुतयोपिचुम् ।।

कुलीरसूकरवसा सपिभिर्मधुरैः शृतैः ।
पूरयित्वा महायोनिं बध्नीयात्क्षौमनक्तकैः ।।

प्रसृतां सर्पिषाभ्यज्य क्षीरस्विन्ना ....जयेत् ।
बध्नीया....शचारश्च पिण्डेनामूत्रकालतः ।।

यच्च वातविकाराणां कर्मोक्तं तच्च कारयेत् ।
सर्वव्यापत्समतिमान् महायोन्यां विशेषतः ।।

रक्तयोन्यामसृग्वर्णै रनुबन्धमवेक्ष्य च ।
यत्र दोषचयं युञ्ज्या दुक्तास्फोटनमौषधम् ।।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

क्वथितं कृष्णगोक्षीर मुदुम्बरसपीलुभिः ।
नालिकेरस्य पुष्पाणां ससिता माक्षिकं रसम् ॥

क्षीरेणासननिर्यासं पिबेद्वा माधवीकफम् ।
जपाप्रसूनं पथ्यां वा मूलं वा शरपुंखतः ॥

ब्रह्मदण्डी हंसपादी मूलं बालाजयायुतम् ।
धात्रीत्वचं वंशमषीमधुना तक्रसंयुताम् ॥

अथवा कर्मतानंता चन्दनं तण्डुलाम्बुना ।
तद्वज्जपा राजजम्बू पल्लवोत्पलकण्टकम् ॥६००॥

सयष्टीमधुकद्राक्षा माक्षिकस्वर्णगैरिकैः ।
महालोहितजित्पश्च त्वक्कषायः समाक्षिकः ॥

नालिकेरप्रसूनैर्वा जपया बतपाधवा

खदिरबालजला....शारिबा वृषजपाम्बुजपादपल्लवैः ।
वल्कलैर्जयति सामकैः शृतां बुत्प्रदरमाशुसितामधुसंयुतम् ॥

जम्बूचूतफलास्थिमुस्तकुटजक्षीरद्रुमत्वक्फला
वाशातिन्दुकचन्दनप्रतिवि लोध्रामृताभीरुभिः ।
सापामार्गकलिङ्गशालमलिरसैः सिद्धं गुडेनान्वितं
सक्षौद्रं च निराकरोति सहितैर्वासृग्दरास्थिस्त्रवौ ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

जम्बूदुम्बरवल्कलं खदिरजं सारप्रसूनं तथा
नारीकेलभवं च कृष्णकदली कन्दस्तथैव शृतम् ।
लाक्षाचूर्णविमिश्रितं मधुयुतं रात्रिस्थितं पाययै
दुर्मांसृक्प्रदरास्रपित्तसिकतामेहैर्भृशं पीडितान् ॥

तिलचूर्णं दधियुतं फाणितं सौकरी वसा ।
क्षौद्रयुक्तं जयेच्छीतं वातोत्तरमसृग्दरम् ॥

कुभाण्डपत्रनिर्यासस्तैलयुक्तश्चतुर्गुणः ।
वराहस्य रसो मध्यः सकौलत्वक्चतुर्गुणः ॥

पत्रकल्कघृते भृष्ट्वा राजादनकपित्थयोः ।
शर्कराक्षौद्रयष्ट्याह्व नागरैश्च भृतं दधि ॥

दध्ना सौवर्चलाजाजी यष्ट्यादिवरमाक्षिकम् ।
सर्पिर्मधुयुतः क्वाथः काकमाचीदलस्य च ॥

मुस्तामृतामधुकचन्दनसेव्यविश्व माषाग्निमन्थकणमुद्गकुलत्थाचित्रैः ।
यत्पाटलीचणककण्टकिमूलयुक्तै स्सिद्धं तदम्बु ससितामधुजातवातैः ॥

पयस्युत्पलशालूक बिसकालेयवारिजम् ।
सपयः शर्कराक्षौद्रं रक्तपित्तोत्तरे पिबेत् ॥६११॥

तण्डुलीयकमूलं वा सक्षौद्रं तण्डुलाम्बुना ।
सतार्क्ष्यशैलं लाजं वा छागेन पयसा पिबेत् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वशाघृतं महातिक्तं रक्तपित्तहितं च यत् ।
ससिता नवनीतं वा लेहयेत्पद्मकेसरम् ।।

क्षीरीत्वक्त्रिफलामुस्ताक्षपाखदिरसंभृतम् ।
पुष्करं पुष्कराक्षीणां श्लेष्मशोणितनाशनम् ।।

निम्बतिन्दुकयष्ट्याह्व सौराष्ट्रीलोध्रवत्सकैः ।
अमृतासहितैः सिद्धः क्वाथश्च मधुमिश्रितः ।।

तण्डुलीयसितातार्क्ष्य करवन्दहिमोत्पलम् ।
यष्ट्याह्वं मधुना लेह्यं दध्नावारखुभवो मलः ।।

पाठाजम्ब्वाम्लयोरस्थि शिलोद्भेदं रसाञ्जनम् ।
अम्बष्ठा शाल्मलीपिञ्छ समङ्गावत्सकत्वचम् ।।

बाह्लीकबिल्वातिविषा लोध्रतोयदगैरिकम् ।
शुण्ठीमधुकमृद्वीका रक्तचन्दनकट्फलम् ।।

कट्वङ्गवत्सकानन्त धातकीमधुकाञ्जनम् ।
पुष्पे गृहीत्वा सञ्चूर्ण्य सक्षौद्रं तण्डुलाम्बुना ।।

पिबेदर्ते त्वतीसारे रक्तं यश्चोपवेश्यते ।
दोषागंतु कृता ये च बालानां तांश्च नाशयेत् ।।६२०।।

योनिदोषं रजोदोषं श्यात्रं श्वेतारुणासितम् ।
आधाय शुष्क जम्बूना माढकं साधुकुट्टितम् ।।

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

वल्कलं सलिलद्रोणे पक्त्वास्मिन् पादशेषिते ।
सुनिष्पण्णरसप्रस्थे प्रस्थे च दधिमस्तुनः ॥

धातकीलोध्रमधुकं शाल्मल्युत्पलकेसरैः ।
........वस्तुकद्राक्षा पाठाखर्जूरदाडिमैः ॥

कपित्थदीप्यबिल्वोत्थे समङ्गानागकेसरैः ।
कारवीद्विस्थिरामातं जम्बूफलकसेरुकैः ॥

शारिबाचन्दनोशीरै घृतप्रस्थं विपाचयेत् ।
एतत्प्रदरपित्तासृग्रक्तार्शोऽस्थिस्फार्जियेत् ॥

कुटजारुष्कर....व ग्र्यान्य....गणेन च ।
सिद्धगणानाम.... कुमुदोत्पलकेसरैः ॥

घनचन्दनमृद्वीका शारिबोशीरवत्सकैः ।
धातकीमोचनिर्यासां तण्डुलीयपरूषकैः ॥

लाक्षावशिरवर्षाभू बिल्वपेशीवृषाञ्जनैः ।
काश्मर्यगिरिमृद्दार्वी जम्बूपल्लवदाडिमैः ॥

पाठा.......लिनी कार्पासानागकेसरैः ।
नारिकेलजपारम्भा पुष्पैर्द्विगुणदुग्धकम् ॥

सिद्धं जयेद्घृतप्रस्थं पाण्डुप्रदरकामिलाः ।
पित्तगुल्मसृक्पित्त मस्थिस्रावं व्रणं तृषम् ॥६३०॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

रक्तातीसार रक्तार्शो मूर्च्छागर्भच्युतीरपि ।

पाठागैरिकमोचदाडिममहानिम्बप्रियंग्वंबुभिः
द्राक्षौदुम्बरचन्दनामृतविषालोध्राग्रजम्ब्वस्थिभिः ।
सक्षीरं मुसली मृणालकदलीकन्देजपाया रसे
सर्पिः सिद्धमुदाहृतं हितकरं स्त्रीणां महाशोणिते ॥

धात्रीविदारीक्षुशतावरीणां कूश्माण्डकानां च रसेन दुग्धम् ।
द्राक्षासिताचन्दनयष्टिकल्कं घृतं विपक्कं सितया च युक्तम् ॥

असृग्दरं पित्तजपाण्डुगुल्म मध्वीस्रुतीव्यापदमार्तवश्च ।
सन्यासपित्तप्रभवानिहन्या न्मूर्च्छामदोन्मादमदात्ययादीन् ॥

योन्यां बलीसदुष्टायां सर्वं रूक्षणोष्णमौषधम् ।
पिप्पलीमाषमरिच शताह्वाकुष्ठसैन्धवैः ॥

वर्तिः कृता क्षणं धार्या सेकव्या च सुरवाम्बुना ।
उदुम्बरशलाटूनां द्रोणं द्रोणाम्भसि क्षिपेत् ॥

सपञ्चवल्कतिलक मालतीनिम्बपल्लवम् ।
निशास्थिते जले तस्मिन् तैलप्रस्थं विपाचयेत् ॥

पलाशशाल्मलीलाक्ष धवनिर्यासवल्कलैः ।
पिष्टैर्युक्तं ततस्तेन पिचुं योनौ निधापयेत् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सशर्करैः कषायैश्च शनैः कुर्वीत सेचनम् ।
सलोध्रकल्केन वट त्वक्कषायेण दापयेत् ॥

रोहीतकजटावल्कं बीजमामलकस्य वा ।
त्रिफलामुसलीकन्दं लिह्याद्वा ससिता मधु ॥६४०॥

तलपोटस्य मूलं वा नग्नजित्काकजङ्घयोः ।
पूर्वं तक्रेण वा दध्ना मूलं वा मातुलुङ्गजम् ॥

मधुना धातकीपुष्पं जपापुष्पं जलेन वा ।
नागकेसरकल्कं वा सतक्रं तत्र भोजनम् ॥

विश्वैलाकणमुसली गोक्षुरवंशीसितारजः पीतम् ।
हिमपयसास्थिस्रावं प्रबलं प्रदरं च पित्तास्रम् ॥

पक्वं मोदकवल्कलस्य बहुशः क्वाथेन कल्केन च
क्वाथे षड्गुणिते ......बिलभवं पुष्पानुगोक्तौषधैः ।
तद्वज्जाम्बववल्कवारिणि समक्षीरं घृतं वंक्षिणा
अस्थिस्रावमसृग्दरं प्रशमयेत्कृच्छ्राणि सर्वाणि च ॥

पक्वाम्रामारम्भाफलाश्च गन्धाकल्कैः शर्कराचूर्णमिश्रम् ।
सर्पिर्धात्रीतालपत्रीकषाये स्त्रीणामस्थिस्रावरोगं निहन्ति ॥

खदिरसोमलतावृषनाकुली ककुभतिन्दुकपार्थकपित्थकैः ।
समधुकामलं परिपाचितं तिलजमुद्धरतिप्रदरं सितम् ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

शूनोत्तकोन्नतास्तब्ध पिच्छिलास्राविणी तथा ।
विप्लुतोपप्लुतायोनिः सिद्ध्येत्सस्फोटशूलिनी ॥

यत्रान्नमथवारिष्टं शीघ्रं तैलं च शीलयेत् ।
''पिप्पल्ययोरजः पथ्या प्रयोगांश्च समाक्षिकान् ॥
आस्रावे सति लोध्राम्बु भावितान् क्षौमनक्तकान् ॥

प्लक्षत्वङ्मांसखण्डं वा धारयेन्मधुना युतम् ।
स्रवेच्चेदोर्धमभ्यज्यो धूपयेद्वा घृतप्लुतैः ॥६५०॥

सरालो गुग्गुलुयवैः सतैलैः कटुमत्स्यजैः ।
आरग्वधादिवर्गस्य कषायपरिषेचनम् ॥

स्तब्धानां शर्कराणां च कार्यं मारवक······
······णं वेषवारस्य प्रसरापयसस्य च ॥

दुर्गन्धानां कषायस्य तैलं वा कल्क एव वा ।
चूर्णो वा सर्वगन्धानां पूतिगन्धापकर्षणम् ॥

अर्शसां योनिजातानां क्रिया मेढ्रार्शसामिव ।
वातयोनिघ्नतैलाम्ल संयुक्तावस्तयो हिताः ॥

स्नेहस्वेदौ च सक्षीर मधुरौ पित्तयोनिषु ।
······रतीपित्तघ्नं कर्म च श्लेष्मयोनिषु ॥

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

सन्निपाते समुत्थानां कर्म साधारणं हितम् ।
एवं योनिषु शुद्धासु गर्भं विन्दन्ति योषितः ॥

शस्यते गुह्यरोगेषु गणेशादित्यपूजनम् ।
लिङ्गयोनिगदा एवं चत्वारिंशदुदाहृताः ॥६५७॥

इति श्रीनाथपण्डितकृतौ परहितसंहिताया मष्टाङ्गकाण्डे
शल्याधिकारो नाम पञ्चमः परिच्छेदः ॥

Vaidyaraj Zinda Baatji
National Ayurvedic Library
Punjabi Bagh, New Delhi-26
Call No.............................
Book No. 000266

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Bharatiya Vidya Bhavan, New Delhi Collection

In Public Domain. Digitization by eGangotri and Sarayu Trust

Bharatiya Vidya Bhavan, New Delhi Collection